# શ્રી યોગસાર પ્રકરણમ્

## (પ્રથમઃ પ્રસ્તાવઃ)

## યથાવસ્થિતદેવસ્વરૂપોપદેશઃ

પ્રણમ્ય પરમાત્માનં, રાગદ્વેષવિવર્જિતમ્।
યોગસારં પ્રવક્ષ્યામિ, ગમ્ભીરાર્થં સમાસતઃ ॥૧॥
યદા ધ્યાયતિ યદ્ યોગી, યાતિ તન્મયતાં તદા।
ધ્યાતવ્યો વીતરાગસ્તદ્, નિત્યમાત્મવિશુદ્ધયે ॥૨॥
શુદ્ધસ્ફટિકસંકાશો, નિષ્કલશ્ચાત્મનાત્મનિ।
પરમાત્મેતિ સંજ્ઞાતઃ, પ્રદત્તે પરમં પદમ્ ॥૩॥
કિન્તુ ન જ્ઞાયતે તાવદ્, યાવદ્ માલિન્યમાત્મનઃ।
જાતે સામ્યેન નૈર્મલ્યે, સ સ્ફુટઃ પ્રતિભાસતે ॥૪॥
તત્ત્વનન્તાનુબન્ધ્યાદિ, -કષાયવિગમક્રમાત્।
આત્મનઃ શુદ્ધિકૃત્ સામ્યં, શુદ્ધં શુદ્ધતરં ભવેત્ ॥૫॥
સામ્યશુદ્ધિક્રમેણૈવ, સ વિશુદ્ધ્યત આત્મનઃ।
સમ્યક્ત્વાદિગુણેષુ સ્યાત્, સ્ફુટઃ સ્ફુટતરઃ પ્રભુઃ ॥૬॥
સર્વમોહક્ષયાત્ સામ્યે, સર્વશુદ્ધે સયોગિનિ (નઃ)।
સર્વશુદ્ધાત્મનસ્ત્વેષ, પ્રભુઃ સર્વસ્ફુટીભવેત્ ॥૭॥
કષાયા અપસર્પન્તિ, યાવત્ ક્ષાન્ત્યાદિતાડિતાઃ।
તાવદાત્મૈવ શુદ્ધોઽયં, ભજતે પરમાત્મતામ્ ॥૮॥
અપસર્પન્તિ તે યાવત્, પ્રબલીભૂય દેહિષુ।
સ તાવન્મલિનીભૂતો, જહાતિ પરમાત્મતામ્ ॥૯॥
કષાયાસ્તન્નિહન્તવ્યા, -સ્તથા તત્સહચારિણઃ।
નોકષાયાઃ શિવદ્વારા,-ર્ગલીભૂતા મુમુક્ષુભિઃ ॥૧૦॥
હન્તવ્યઃ ક્ષમયા ક્રોધો, માનો માર્દવયોગતઃ।
માયા ચાર્જવભાવેન, લોભઃ સંતોષપોષતઃ ॥૧૧॥
હર્ષઃ શોકો જુગુપ્સા ચ, ભયં રત્યરતી તથા।
વેદત્રયં ચ હન્તવ્યં, તત્ત્વજ્ઞૈર્દૃઢધૈર્યતઃ ॥૧૨॥
રાગદ્વેષમયેષ્વેષુ, હતેષ્વાન્તર-વૈરિષુ।
સામ્યે સુનિશ્ચલે યાયા, -દાત્મૈવ પરમાત્મતામ્ ॥૧૩॥
સ તાવદ્ દેહિનાં ભિન્નઃ, સમ્યગ્ યાવન્ન લક્ષ્યતે।
લક્ષિતસ્તુ ભજત્યૈક્યં, રાગાદ્યઞ્જનમાર્જનાત્ ॥૧૪॥
યાદૃશોઽનન્તવીર્યાદિ,-ગુણોઽતિવિમલઃ પ્રભુઃ।
તાદૃશાસ્તેઽપિ જાયન્તે, કર્મમાલિન્યશોધનાત્ ॥૧૫॥
આત્માનો દેહિનો ભિન્નાઃ, કર્મપઙ્કકલઙ્કિતાઃ।
અદેહઃ કર્મનિર્મુક્તઃ, પરમાત્મા ન ભિદ્યતે ॥૧૬॥
સંખ્યયાનેકરૂપોઽપિ, ગુણતસ્ત્વેક એવ સઃ।
અનન્તદર્શનજ્ઞાન,-વીર્યાનન્દગુણાત્મકઃ ॥૧૭॥
જાતરૂપં યથાજાત્યં, બહુરૂપમપિ સ્થિતમ્।
સર્વત્રાપિ તદેવૈકં, પરમાત્મા તથા પ્રભુઃ ॥૧૮॥
આકાશવદરૂપોઽસૌ, ચિદ્રૂપો નીરુજઃ શિવઃ।
સિદ્ધિક્ષેત્રગતોઽનન્તો, નિત્યઃ શં પરમશ્નુતે ॥૧૯॥
યેનૈવારાધિતો ભાવાત્, તસ્યાસૌ કુરુતે શિવમ્।
સર્વજન્તુસમસ્યાસ્ય, ન પરાત્મવિભાગિતા ॥૨૦॥
કૃતકૃત્યોઽયમારાધ્યઃ, સ્યાદાજ્ઞાપાલનાત્ પુનઃ।
આજ્ઞા તુ નિર્મલં ચિત્તં, કર્તવ્યં સ્ફટિકોપમમ્ ॥૨૧॥

જ્ઞાનદર્શનશીલાનિ, પોષણીયાનિ સર્વદા।
રાગદ્વેષાદયો દોષા, હન્તવ્યાશ્ચ ક્ષણે ક્ષણે ॥૨૨॥
એતાવત્યેવ તસ્યાજ્ઞા, કર્મદ્રુમકુઠારિકા।
સમસ્તદ્વાદશાઙ્ગાર્થ,-સારભૂતાતિદુર્લભા ॥૨૩॥
વિશ્વસ્ય વત્સલેનાપિ, ત્રૈલોક્યપ્રભુણાપિ ચ।
સાક્ષાદ્ વિહરમાણેન, શ્રીવીરેણ તદા કિલ ॥૨૪॥
ત એવ રક્ષિતા દુઃખ,-ભૈરવાદ્ ભવસાગરાત્।
ઇયં યૈઃ સ્વીકૃતા ભક્તિ,-નિભરૈરભયાદિભિઃ ॥૨૫॥
યૈસ્તુ પાપભરાક્રાન્તૈઃ, કાલશૌકરિકાદિભિઃ।
ન સ્વીકૃતા ભવામ્ભોધૌ, તે ભ્રમિષ્યન્તિ દુઃખિતાઃ ॥૨૬॥
સર્વજન્તુહિતાજ્ઞૈવા,-જ્ઞૈવ મોક્ષૈકપદ્ધતિઃ।
ચરિતાજ્ઞૈવ ચારિત્ર,-માજ્ઞૈવ ભવભઞ્જની ॥૨૭॥
ઇયં તુ ધ્યાનયોગેન, ભાવ-સારસ્તુતિસ્તવૈઃ।
પૂજાદિભિઃ સુચારિત્ર,-ચર્યયા પાલિતા ભવેત્ ॥૨૮॥
આરાધિતોઽસ્ત્વસૌ, ભાવસ્તવેન વ્રતચર્યયા।
તસ્ય પૂજાદિના દ્રવ્ય-, સ્તવેન તુ સરાગતઃ ॥૨૯॥
ચિન્તામણ્યાદિકલ્પસ્ય, સ્વયં તસ્ય પ્રભાવતઃ।
કૃતો દ્રવ્યસ્તોઽપિ સ્યાત્, કલ્યાણાય તદર્થિનામ્ ॥૩૦॥
સ્વર્ગાપવર્ગદો દ્રવ્ય,-સ્તવોઽત્રાપિ સુખાવહઃ।
હેતુશ્ચિત્તપ્રસત્તેસ્તત્, કર્તવ્યો ગૃહિણા સદા ॥૩૧॥
ભવેદ્ વિરતિરપ્યસ્ય, યથાશક્તિ પુનર્યદિ।
તતઃ પ્રક્ષરિતઃ સિંહઃ, કર્મનિર્મથનં પ્રતિ ॥૩૨॥
શ્રાવકો બહુકર્માપિ, પૂજાદ્યૈઃ શુભભાવતઃ।
દલયિત્વાખિલં કર્મ, શિવમાપ્નોતિ સત્વરમ્ ॥૩૩॥
યેનાજ્ઞા યાવદારાદ્ધા, સ તાવલ્લભતે સુખમ્।
યાવદ્ વિરાધિતા યેન, તાવદ્ દુઃખં લભેત સઃ ॥૩૪॥
સદા તત્પાલને લીનૈઃ, પરમાત્માત્મનાત્મનિ।
સમ્યક્ સ જ્ઞાયતે જ્ઞાતો, મોક્ષં ચ કુરુતે પ્રભુઃ ॥૩૫॥
બુદ્ધો વા યદિ વા વિષ્ણુ,-ર્યદ્વા બ્રહ્માથવેશ્વરઃ।
ઉચ્યતાં સ જિનેન્દ્રો વા, નાર્થભેદસ્તથાપિ હિ ॥૩૬॥
મમૈવ દેવો દેવઃ સ્યાત્, તવ નૈવેતિ કેવલમ્।
મત્સરસ્ફૂર્જિતં સર્વ,-મજ્ઞાનાનાં વિજૃમ્ભિતમ્ ॥૩૭॥
યથાવસ્થિતવિજ્ઞાત,-તત્સ્વરૂપાસ્તુ કિં ક્વચિત્।
વિવદન્તે મહાત્માન,-સ્તત્ત્વવિશ્રાન્તદષ્ટયઃ? ॥૩૮॥
સ્વરૂપં વીતરાગત્વં, પુનસ્તસ્ય ન રાગિતા।
રાગો યદ્યત્ર તત્રાન્યે, દોષા દ્વેષાદયો ધ્રુવમ્ ॥૩૯॥
તૈર્દોષૈર્દૂષિતો દેવઃ, કથં ભવિતુમર્હતિ?।
ઇત્થં માધ્યસ્થ્યમાસ્થાય, તત્ત્વબુદ્ધ્યાવધાર્યતામ્ ॥૪૦॥
યદ્વા રાગાદિભિર્દોષૈઃ, સર્વસંક્લેશકારકૈઃ।
દૂષિતેન શુભેનાપિ, દેવેનૈવ હિ તેન કિમ્ ॥૪૧॥
વીતરાગં યતો ધ્યાયન્, વીતરાગો ભવેદ્ ભવી।
ઇલિકા ભ્રમરીભીતા, ધ્યાયન્તી ભ્રમરીં યથા ॥૪૨॥
રાગાદિદૂષિતં ધ્યાયન્, રાગાદિવિવશો ભવેત્।
કામુકઃ કામિનીં ધ્યાયન્, યથા કામૈકવિહ્વલઃ ॥૪૩॥
રાગાદયસ્તુ પાપ્માનો, ભવભ્રમણકારણમ્।
ન વિવાદોઽત્ર કોઽપ્યસ્તિ, સર્વથા સર્વસંમતે ॥૪૪॥

વીતરાગમતો ધ્યાયન્, વીતરાગો વિમુચ્યતે।
રાગાદિમોહિતં ધ્યાયન્, વીતરાગો વિમુચ્યતે।
રાગાદિમોહિતં ધ્યાયન્, સરાગો બદ્ધ્યતે સ્ફુટમ્ ॥૪૫॥
ય એવ વીતરાગઃ સ, દેવો નિશ્ચીયતાં તતઃ।
ભવિનાં ભવદમ્ભોલિઃ, સ્વતુલ્યપદવીપ્રદઃ ॥૪૬॥

## (દ્વિતીયઃ પ્રસ્તાવઃ)

## તત્ત્વસારોપદેશકઃ

સર્વેઽપિ સામ્પ્રતં લોકાઃ, પ્રાયસ્તત્ત્વપરાઙ્મુખાઃ।
ક્લિશ્યન્તે સ્વાગ્રહગ્રસ્તા, દૃષ્ટિરાગેણ મોહિતાઃ ॥૧॥
દૃષ્ટિરાગો મહામોહો, દૃષ્ટિરાગો મહાભયઃ।
દૃષ્ટિરાગો મહામારો, દૃષ્ટિરાગો મહાજ્વરઃ ॥૨॥
પતિતવ્યં જનૈઃ સર્વૈઃ, પ્રાયઃ કાલાનુભાવતઃ।
પાપો મત્સરહેતુસ્તદ્, નિર્મિતોઽસૌ સતામપિ ॥૩॥
મોહોપહતચિત્તાસ્તે, મૈત્ર્યાદિભિરસંસ્કૃતાઃ।
સ્વયં નષ્ટા જનં મુગ્ધં, નાશયન્તિ ચ ધિગ્ હહા ॥૪॥
પરે હિતમતિર્મૈત્રી, મુદિતા ગુણોદનમ્।
ઉપેક્ષા દોષમાધ્યસ્થ્યં, કરુણા દુઃખમોક્ષધીઃ ॥૫॥
મૈત્રી નિખિલસત્ત્વેષુ, પ્રમોદો ગુણશાલિષુ।
માધ્યસ્થ્યમવિનેયેષુ, કરૂણા દુઃખિદેહિષુ ॥૬॥
ધર્મકલ્પદ્રુમસ્યૈતા, મૂલં મૈત્ર્યાદિભાવનાઃ।
યૈર્ન જ્ઞાતા ન ચાભ્યસ્તાઃ, સ તેષામતિદુર્લભઃ ॥૭॥
અહો વિચિત્રં મોહાન્ધ્યં, તદન્ધૈરિહ યજ્જનૈઃ।
દોષા અસન્તોઽપીક્ષ્યન્તે, પરે સન્તોઽપિ નાત્મનિ ॥૮॥
મદીયં દર્શનં મુખ્યં, પાખણ્ડાન્યપરાણિ તુ।
મદીય આગમઃ સારઃ, પરકીયાસ્ત્વસારકાઃ ॥૯॥
તાત્ત્વિકા વયમેવાન્યે, ભ્રાન્તાઃ સર્વેઽપ્યતાત્ત્વિકાઃ।
ઇતિ મત્સરિણો દૂરોત્, -સારિતાસ્તત્ત્વસારતઃ ॥૧૦॥
યથાહતાનિ ભાણ્ડાનિ, વિનશ્યન્તિ પરસ્પરમ્।
કુર્વન્તઃ પરદોષાણાં, ગ્રહણં ભવકારણમ્ ॥૧૨॥
યથા પરસ્ય પશ્યન્તિ, દોષાન્ યદ્યાત્મનસ્તથા।
સૈવાજરામરત્વાય, રસસિદ્ધિસ્તદા નૃણામ્ ॥૧૩॥
રાગદ્વેષવિનાભૂતં, સામ્યં તત્ત્વં યદુચ્યતે।
સ્વશંસિના ક્વ તત્ તેષાં, પરદૂષણદાયિનામ્ ॥૧૪॥
માનેઽપમાને નિન્દાયાં, સ્તુતૌ વા લોષ્ઠુકાઞ્ચને।
જીવિતે મરણે લાભા,-લાભે રઙ્કે મહર્દ્ધિકે ॥૧૫॥
શત્રૌ મિત્રે સુખે દુઃખે, હૃષીકાર્થે શુભાશુભે।
સર્વત્રાપિ યદેકત્વં, તત્ત્વં તદ્ ભેદ્યતાં પરમ્ ॥૧૬॥
અષ્ટકસ્યાપિ યોગસ્ય, સારભૂતમિદં ખલુ।
યતો યમાદિવ્યાસોઽસ્મિન્, સર્વોઽપ્યસ્યૈવ હેતવે ॥૧૭॥
ક્રિયતે દધિસારાય, દધિમન્થો યથા કિલ।
તથૈવ સામ્યસારાય, યોગાભ્યાસો યમાદિકઃ ॥૧૮॥
અદ્ય કલ્યેઽપિ કૈવલ્યં, સામ્યેનાનેન નાન્યથા।
પ્રમાદઃ ક્ષણમપ્યત્ર, તતઃ કર્તું ન સામ્પ્રતમ્ ॥૧૯॥
કિં બુદ્ધેન કિમીશેન, કિં ધાત્રા કિમુ વિષ્ણુના।
કિં જિનેન્દ્રેણ રાગાદ્યૈ,-ર્યદિ સ્વં કલુષં મનઃ? ॥૨૦॥
કિં નાગ્ન્યેન સિતૈ રક્તૈઃ, કિં પટૈઃ કિં જટાભરૈઃ।

કિં મુણ્ડમુણ્ડનેનાપિ, સામ્યં સર્વત્ર નો યદિ? ॥૨૧॥
કિં વ્રતૈઃ કિં વ્રતાચારૈઃ, કિં તપોભિર્જપૈશ્ચ કિમ્।
કિં ધ્યાનૈઃ કિં તથા ધ્યેયૈ, -ર્ન ચિત્તં યદિ ભાસ્વરમ્ ॥૨૨॥
કિં ક્લિષ્ટેન્દ્રિયરોધેન, કિં સદા પઠનાદિભિઃ।
કિં સર્વસ્વપ્રદાનેન, તત્ત્વં નોન્મીલિતં યદિ? ॥૨૩॥
નાઞ્ચલો મુખવસ્ત્રં ન, ન રાકા ન ચતુર્દશી।
ન શ્રાદ્ધાદિપ્રતિષ્ઠા વા, તત્ત્વં કિન્ત્વમલં મનઃ ॥૨૪॥
દૃષ્ટ્વા શ્રીગૌતમં બુદ્ધૈ,-સ્ત્રિપઞ્ચશતતાપસૈઃ।
ભરતપ્રમુખૈર્વાપિ, ક્વ કૃતો બાહ્યકુગ્રહઃ? ॥૨૫॥
દૃઢપ્રહારિવીરેણ, ચિલાતીપુત્રયોગિના।
ઇલાપુત્રાદિભિશ્ચૈવ, સેવિતો યોગ ઉત્તમઃ ॥૨૬॥
યેન કેન પ્રકારેણ, દેવતારાધનાદિના।
ચિત્તં ચન્દ્રોજ્જ્વલં કાર્યં, કિમન્યૈર્ગ્રહકુગ્રહૈઃ? ॥૨૭॥
તથા ચિન્ત્યં તથા વાચ્યં, ચેષ્ટિતવ્યં તથા તથા।
મલીમસં મનોઽત્યર્થં, યથા નિર્મલતાં વ્રજેત્ ॥૨૮॥
ચઞ્ચલસ્યાસ્ય ચિત્તસ્ય, સદૈવોત્પથચારિણઃ।
ઉપયોગપરૈઃ સ્થેયં યોગિભિર્યોગકાઙ્ક્ષિભિઃ ॥૨૯॥
સુકરં મલધારિત્વં, સુકરં દુસ્તપં તપઃ।
સુકરોઽક્ષનિરોધશ્ચ, દુષ્કરં ચિત્તશોધનમ્ ॥૩૦॥
પાપબુદ્ધ્યા ભવેત્ પાપં, કો મુગ્ધોઽપિ ન વેત્ત્યદઃ।
ધર્મબુદ્ધ્યા તુ યત્ પાપં, તચ્ચિન્ત્યં નિપુણૈર્બુધૈઃ ॥૩૧॥
અણુમાત્રા અપિ ગુણા, દૃશ્યન્તે સ્વધિયાત્મનિ।
દોષાસ્તુ પર્વતસ્થૂલા, અપિ નૈવ કથંચન ॥૩૨॥
ત એવ વૈપરીત્યેન, વિજ્ઞાતવ્યાઃ પરં વચઃ।
દિઙ્મોહ ઇવ કોઽપ્યેષ, મહામોહો મહાબલઃ ॥૩૩॥
ધર્મસ્ય બહુધાધ્વાનો, લોકે વિભ્રમહેતવઃ।
તેષુ બાહ્યફટાટોપા-, ત્તત્વવિભ્રાન્તદૃષ્ટયઃ ॥૩૪॥
સ્વસ્વદર્શનરાગેણ, વિવદન્તો મિથો જનાઃ।
સર્વથૈવાત્મનો ધર્મં, મન્યન્તે ન પરસ્ય તુ ॥૩૫॥
યત્ર સામ્યં સ તત્રૈવ, કિમાત્મપરચિન્તયા।
જાનીત તદ્વિના હંહો!, નાત્મનો ન પરસ્ય ચ ॥૩૬॥
ક્ષાન્ત્યાદિર્દશધા ધર્મઃ, સર્વધર્મશિરોમણિઃ।
સોઽપિ સામ્યવતામેવ, મૈત્ર્યાદિકૃતકર્મણામ્ ॥૩૭॥
સામ્યં સમસ્તધર્માણાં, સારં જ્ઞાત્વા તતો બુધાઃ।
બાહ્યં દૃષ્ટિગ્રહં મુક્ત્વા, ચિત્તં કુરુત નિર્મલમ્ ॥૩૮॥

## (તૃતીયઃ પ્રસ્તાવઃ)
## સામ્યોપદેશઃ

સહજાનન્દસામ્યસ્ય, વિમુખા મૂઢબુદ્ધ્યઃ।
ઇચ્છન્તિ દુઃખદં દુઃખો,-ત્પાદ્યં વૈષયિકં સુખમ્ ॥૧॥
કષાયા વિષયા દુઃખ-, મિતિ વેત્તિ જનઃ સ્ફુટમ્।
તથાપિ તન્મુખઃ કસ્માદ્, ધાવતીતિ ન બુધ્યતે ॥૨॥
સર્વસઙ્ગ-પરિત્યાગઃ, સુખમિત્યપિ વેત્તિ સઃ।
સંમુખોઽપિ ભવેત્ કિં ન, તસ્યેત્યપિ ન બુધ્યતે ॥૩॥
સૂક્ષ્માઃ સૂક્ષ્મતરા ભાવા, ભદ્યન્તે સૂક્ષ્મબુદ્ધિભિઃ।
એતદ્ દ્વયં તુ દુર્ભેદં, તેષામપિ હિ કા ગતિઃ? ॥૪॥
અપરાધાક્ષમા ક્રોધો, માનો જાત્યાદ્યહંકૃતિઃ।

લોભઃ પદાર્થતૃષ્ણા ચ, માયા કપટચેષ્ટિતમ્ ॥૫॥
શબ્દરૂપસસ્પર્શ,- ગન્ધાશ્ચ મૃગતૃષ્ણિકા।
દુઃખયન્તિ જનં સર્વં, સુખાભાસવિમોહિતમ્ ॥૬॥
નોપેન્દ્રસ્ય ન ચેન્દ્રસ્ય, તત્ સુખં નૈવ ચક્રિણઃ।
સામ્યામૃતવિનિર્મગ્નો, યોગી પ્રાપ્નોતિ યત્ સુખમ્ ॥૭॥
રાગોઽભીષ્ટેષુ સર્વેષુ, દ્વેષોઽનિષ્ટેષુ વસ્તુષુ।
ક્રોધઃ કૃતાપરાધેષુ, માનઃ પરપરાભવે ॥૮॥
લોભઃ પરાર્થસંપ્રાપ્તૌ, માયા ચ પરવઞ્ચને।
ગતે મૃતે તથા શોકો, હર્ષશ્ચાગતજાતયોઃ ॥૯॥
અરતિર્વિષયગ્રામે, યાશુભે ચ શુભે રતિઃ।
ચૌરાદિભ્યો ભયં ચૈવ, કુત્સા કુત્સિતવસ્તુષુ ॥૧૦॥
વેદોદયશ્ચ સંભોગે, વ્યલીયેત મુનેર્યદા।
અન્તઃશુદ્ધિકરં સામ્યા,- ઽમૃતમુજ્જૃમ્ભતે તદા ॥૧૧॥
એતેષુ યેન કેનાપિ, કૃષ્ણસર્પેણ દેહિનઃ।
દૃષ્ટસ્ય નશ્યતિ ક્ષિપ્રં, વિવેકવરજીવિતમ્ ॥૧૨॥
દુર્વિજેયા દુરુચ્છેદ્યા, એતેઽભ્યન્તરવૈરિણઃ।
ઉત્તિષ્ઠમાના એવાતો, રક્ષણીયાઃ પ્રયત્નતઃ ॥૧૩॥
યદ્યાત્મા નિર્જિતોઽમીભિ,- સ્તતો દુઃખાગમો મહાન્।
યદ્યાત્મના જિતા એતે, મહાન્ સૌખ્યાગમસ્તદા ॥૧૪॥
સહજાનન્દતા સેયં, સૈવાત્મારામતા મતા।
ઉન્મનીકરણં તદ્ યદ્, મુનેઃ શમરસે લયઃ ॥૧૫॥
સામ્યં માનસભાવેષુ, સામ્યં વચનવીચિષુ।
સામ્યં કાયિકચેષ્ટાસુ, સામ્યં સર્વત્ર સર્વદા ॥૧૬॥
સ્વપતા જાગ્રતા રાત્રૌ, દિવા ચાખિલકર્મસુ।
કાયેન મનસા વાચા, સામ્યં સેવ્યં સુયોગિના ॥૧૭॥
યદિ ત્વં સામ્યસંતુષ્ટો, વિશ્વં તુષ્ટં તદા તવ।
તલ્લોકસ્યાનુવૃત્ત્યા કિં?, સ્વમેવૈકં સમં કુરુ ॥૧૮॥
શ્રુતશ્રામણ્યયોગાનાં, પ્રપઞ્ચઃ સામ્યહેતવે।
તથાપિ તત્ત્વતસ્તસ્માજ્, જનોઽયં પ્લવતે બહિઃ ॥૧૯॥
સ્વાધીનં સ્વં પરિત્યજ્ય, વિષમં દોષમન્દિરમ્।
અસ્વાધીનં પરં મૂઢ!, સમીકર્તું કિમાગ્રહઃ ॥૨૦॥
વૃક્ષસ્ય છેદ્યમાનસ્ય, ભૂષ્યમાણસ્ય વાજિનઃ।
યથા ન રોષસ્તોષશ્ચ, ભવેદ્ યોગી સમસ્તથા ॥૨૧॥
સૂર્યો જનસ્ય તાપાય, સોમઃ શીતાય વિદ્યતે।
તદ્ યોગી સૂર્યસોમાભઃ, સહજાનન્દતાં ભજેત્ ॥૨૨॥
યથા ગુડાદિદાનેન, યત્ કિંચિત્ ત્યાજ્યતે શિશુઃ।
ચલં ચિત્તં શુભધ્યાને,-નાશુભં ત્યાજ્યતે તથા ॥૨૩॥
સર્વભૂતાવિનાભૂતં, સ્વં પશ્યન્ સર્વદા મુનિઃ।
મૈત્રાદ્યમૃતસંમગ્નઃ, ક્વ ક્લેશાંશમપિ સ્પૃશેત્? ॥૨૪॥
નાજ્ઞાનાદ્ બાલકો વેત્તિ, શત્રુમિત્રાદિકં યથા।
તથાત્ર ચેષ્ટતે જ્ઞાની, તદિહૈવ પરં સુખમ્ ॥૨૫॥
તોષણીયો જગન્નાથ,-સ્તોષણીયશ્ચ સદ્ગુરુઃ।
તોષણીયસ્તથા સ્વાત્મા, કિમન્યૈર્બત તોષિતૈઃ? ॥૨૬॥
કષાયવિષયાક્રાન્તો, બહિર્બુદ્ધિરયં જનઃ।
કિં તેન રુષ્ટતુષ્ટેન, તોષરોષૌ ચ તત્ર કિમ્? ॥૨૭॥
અસદાચારિણઃ પ્રાયો, લોકાઃ કાલાનુભાવતઃ।

દ્વેષસ્તેષુ ન કર્તવ્યઃ, સંવિભાવ્ય ભવસ્થિતિમ્ ॥૨૮॥
નિઃસઙ્ગો નિર્મમઃ શાન્તો, નિરીહઃ સંયમે રતઃ।
યદા યોગી ભવેદન્ત,-સ્તત્ત્વમુદ્ભાસતે તદા ॥૨૯॥
સદ્વૃક્ષં પ્રાપ્ય નિર્વાતિ, રવિતપ્તો યથાધ્વગઃ।
મોક્ષાધ્વસ્થસ્તપસ્તપ્ત,-સ્તથા યોગી પરં લયમ્ ॥૩૦॥
ઇતિ સામ્યતનુત્રાણ,-ત્રાતચારિત્રવિગ્રહઃ।
મોહસ્ય ધ્વજિનીં ધીરો, વિધ્વંસયતિ લીલયા ॥૩૧॥

## (ચતુર્થઃ પ્રસ્તાવઃ)

## સત્ત્વોપદેશઃ

ત્યક્ત્વા રજસ્તમોભાવૌ, સત્ત્વે ચિત્તં સ્થિરીકુરુ।
ન હિ ધર્માધિકારોઽસ્તિ, હીનસત્ત્વસ્ય દેહિનઃ ॥૧॥
હીનસત્ત્વો યતો જન્તુ,-ર્બાધિતો વિષયાદિભિઃ।
બાઢં પતતિ સંસારે, સ્વપ્રતિજ્ઞાવિલોપનાત્ ॥૨॥
સાવદ્યં સકલં યોગં, પ્રત્યાખ્યાયાન્યસાક્ષિકમ્।
વિસ્મૃતાત્મા પુનઃ ક્લીબઃ, સેવતે ધૈર્યવર્જિતઃ ॥૩॥
તાવદ્ ગુરુવચઃ શાસ્ત્રં, તાવત્ તાવચ્ચ ભાવનાઃ।
કષાયવિષયૈર્યાવદ્, ન મનસ્તરલીભવેત્ ॥૪॥
કષાયવિષયગ્રામે, ધાવન્તમતિદુર્જયમ્।
યઃ સ્વમેવ જયત્યેકં, સ વીરતિલકઃ કુતઃ? ॥૫॥
ધીરાણામપિ વૈધુર્ય,-કરૈ રૌદ્રપરીષહૈઃ।
સ્પૃષ્ટઃ સને કોઽપિ વીરેન્દ્રઃ, સંમુખો યદિ ધાવતિ ॥૬॥
ઉપસર્ગે સુધીરત્વં, સુભીરુત્વમસંયમે।
લોકાતિગં દ્વયમિદં, મુનેઃ સ્યાદ્ યદિ કસ્યચિત્ ॥૮॥
દુસ્સહા વિષયાસ્તાવત્, કષાયા અતિદુઃસહા।
પરીષહોપસર્ગાશ્ચ, ધિગ્ધિગ્ દુઃસહદુઃસહાઃ ॥૮॥
જગત્ત્રયૈકમલ્લશ્ચ, કામઃ કેન વિજીયતે।
મુનિવરં વિના કંચિચ્-, ચિત્તનિગ્રહકારિણમ્ ॥૯॥
મુનયોઽપિ યતસ્તેન, વિવશીકૃતચેતસઃ।
ઘોરે ભવાન્ધકૂપેઽસ્મિન્, પતિત્વા યાન્ત્યધસ્તલમ્ ॥૧૦॥
તાવદ્ ધૈર્યં મહત્ત્વં ચ, તાવત્ તાવદ્ વિવેકિતા।
કટાક્ષવિશિખાન્ યાવદ્, ન ક્ષિપન્તિ મૃગેક્ષણાઃ ॥૧૧॥
ગૃહં ચ ગૃહવાર્તાં ચ, રાજ્યં રાજ્યશ્રિયોઽપિ ચ।
સમર્પ્ય સકલં સ્ત્રીણાં, ચેષ્ટન્તે દાસવજ્જનાઃ ॥૧૨॥
સા મિત્રં સૈવ મન્ત્રી ચ, સા બન્ધુઃ સૈવ જીવિતમ્।
સા દેવઃ સા ગુરુશ્ચૈવ, સા તત્ત્વં સ્વામિની ચ સા ॥૧૩॥
રાત્રૌ દિવા ચ સા સા સા, સર્વં સર્વત્ર સૈવ હિ।
એવં સ્ત્ર્યાસક્તચિત્તાનાં, ક્વ ધર્મકરણે રતિઃ? ॥૧૪॥
સ્ત્રીસમુદ્રેઽત્ર ગમ્ભીરે, નિમગ્નમખિલં જગત્।
ઉન્મજ્જતિ મહાત્માઽસ્માદ્, યદિ કોઽપિ કથંચન ॥૧૫॥
દૂરે દૂરતરે વાસ્તુ, ખડ્ગધારોપમં વ્રતમ્।
હીનસત્ત્વસ્ય હા ચિન્તા, સ્વોદરસ્યાપિ પૂરણે ॥૧૬॥
યત્ તદર્થં ગૃહસ્થાનાં, બહુ ચાટુશતાનિ સઃ।
બહુધા ચ કરોત્યુચ્ચૈઃ, શ્વેવ દૈન્યં પ્રદર્શયન્ ॥૧૭॥
ત્વમાર્યા ત્વં ચ માતા મે, ત્વં સ્વસા ત્વં પિતુઃ સ્વસા।
ઇત્યાદિજ્ઞાતિસંબન્ધાન્, કુરુતે દૈન્યમાશ્રિતઃ ॥૧૮॥
અહં ત્વદીયપુત્રોઽસ્મિ, કવલૈસ્તવ વર્ધિતઃ।

તવ ભાગહરશ્ચૈવ, જીવકસ્તે તવેહકઃ ॥૧૯॥
એવમાદીનિ દૈન્યાનિ, ક્લીબઃ પ્રતિજનં મુહુઃ।
કુરુતે નૈકશસ્તાનિ, કઃ પ્રકાશયિતું ક્ષમઃ? ॥૨૦॥
આગમે યોગિનાં યા તુ, સૈંહી વૃત્તિઃ પ્રદર્શિતા।
તસ્યાસ્ત્રસ્યતિ નામ્નાપિ, કા કથાચરણે પુનઃ? ॥૨૧॥
કિન્તુ સાતૈકલિપ્સુઃ સ, વસ્ત્રાહારાદિમૂર્ચ્છયા।
કુર્વાણો મન્ત્રતન્ત્રાદિ, ગૃહવ્યાપ્તિં ચ ગેહિનામ્ ॥૨૨॥
કથયંશ્ચ નિમિત્તાદ્યં, લાભાલાભં શુભાશુભમ્।
કોટિં કાકિણિમાત્રેણ, હારયેત્ સ્વં વ્રતં ત્યજન્ ॥૨૩॥
ચારિત્રૈશ્વર્યસંપન્નં, પુણ્યપ્રાગ્ભારભાજનમ્।
મૂઢબુદ્ધિર્ન વેત્તિ સ્વં, ત્રૈલોક્યોપરિવર્તિનમ્ ॥૨૪॥
તતશ્ચ ભિક્ષુકપ્રાયં, મન્યમાનો વિપર્યયાત્।
ભાવનિઃસ્વધનેશાનાં, લલનાનિ કરોત્યસૌ ॥૨૫॥
પ્રશાન્તસ્ય નિરીહસ્ય, સદાનન્દસ્ય યોગિનઃ।
ઇન્દ્રદયોઽપિ તે રઙ્ક,-પ્રાયાઃ સ્યુઃ કિમુતાપરાઃ? ॥૨૬॥
કિં વિભુત્વેન કિં ભોગૈઃ, કિં સૌન્દર્યેણ કિં શ્રિયા।
કિં જીવિતેન જીવાનાં, દુઃખં ચેત્ પ્રગુણં પુરઃ ॥૨૭॥
નાર્થ્યતે યાવદૈશ્વર્યં, તાવદાયાતિ સંમુખમ્।
યાવદભ્યર્થ્યતે તાવત્, પુનર્યાતિ પરાઙ્મુખમ્ ॥૨૮॥
અધૈર્યાદવિચાર્યેદ-, મિચ્છાવ્યાકુલમાનસઃ।
હા હા હેતિ તદર્થં સ, ધાવન્ ધાવન્ ન ખિદ્યતે ॥૨૯॥
સ્થિરો ધીરસ્તુ ગમ્ભીરઃ, સંપત્સુ ચ વિપત્સુ ચ।
બાધ્યતે ન ચ હર્ષેણ, વિષાદેન ન ચ ક્વચિત્ ॥૩૦॥
યે સિદ્ધા યે ચ સેત્સ્યન્તિ, સર્વે સત્ત્વે પ્રતિષ્ઠિતાઃ।
સત્ત્વં વિના હિ સિદ્ધિર્ન, પ્રોક્તા કુત્રાપિ શાસને ॥૩૧॥
એવમેવ, સુખનૈવ, સિધ્યન્તિ યદિ કૌલિકાઃ।
તદ્ ગૃહસ્થાદયોઽપ્યેતે, કિં ન સિધ્યન્તિ કથ્યતામ્ ॥૩૨॥
સુખાભિલાષિણોઽત્યર્થં, ગ્રસ્તા ઋદ્ધ્યાદિગૌરવૈઃ।
પ્રવાહવાહિનો હ્યત્ર, દૃશ્યન્તે સર્વજન્તવઃ ॥૩૩॥
એવમેવ સુખેનૈવ, સિદ્ધિર્યદિ ચ મન્યતે।
તત્પ્રાપ્તૌ સર્વજન્તૂનાં, તદા રિક્તો ભવેદ્ ભવઃ ॥૩૪॥
લોકેઽપિ સાત્ત્વિકેનૈવ, જીયતે પરવાહિની।
ઉદ્ધૂલિકોઽપિ નાન્યેષાં, દૃશ્યતેઽસ્નાય નશ્યતામ્ ॥૩૫॥
લોકોત્તરાન્તરઙ્ગસ્ય, મોહસૈન્યસ્ય તં વિના।
સંમુખં નાપરૈઃ સ્થાતું, શક્યતે નાત્ર કૌતુકમ્ ॥૩૬॥
સર્વમજ્ઞસ્ય દીનસ્ય, દુષ્કરં પ્રતિભાસતે।
સત્ત્વૈકવૃત્તિવીરસ્ય, જ્ઞાનિનઃ સુકરં પુનઃ ॥૩૭॥
દ્વિત્રાસ્ત્રિ-ચતુરા વાપિ, યદિ સર્વજગત્યપિ।
પ્રાપ્યન્તે ધૈર્યગામ્ભીર્યૌ,-દાર્યોદિગુણશાલિનઃ ॥૩૮॥
બાહુલ્યેન તદાભાસ,-માત્રા અપિ કલૌ કુતઃ।
બુસપ્રાયસ્તુ લોકોઽયં, પૂરિતો ભવપૂરકૈઃ ॥૩૯॥
માનુષ્યં દુર્લભં લબ્ધ્વા, યે ન લોકોત્તરં ફલમ્।
ગૃહ્ણન્તિ સુખમાયત્યાં, પશવસ્તે નરા અપિ ॥૪૦॥
તત્પુનર્મોક્ષદો ધર્મઃ, શીલાઙ્ગવહનાત્મકઃ।
પ્રતિસ્રોતઃપ્લવાત્ સાધ્યઃ, સત્ત્વસારૈકમાનસૈઃ ॥૪૧॥
તતઃ સત્ત્વમવષ્ટભ્ય, ત્યક્ત્વા કુગ્રાહિણાં ગ્રહમ્।

ક્રિયતાં ભોઃ! સુધર્મસ્ય, કરણાયોદ્યમઃ સદા ॥૪૨॥

## (પઞ્ચમ પ્રસ્તાવઃ)

## ભાવશુદ્ધિજનકોપદેશઃ

કાયેન મનસા વાચા, યત્કર્મ કુરુતે યદા।
સાવધાનસ્તદા તત્ત્વ,-ધર્માન્વેષી મુનિર્ભવેત્ ॥૧॥
ઇષ્ટાનિષ્ટેષુ ભાવેષુ, સદા વ્યગ્રં મનો મુનિઃ।
સમ્યઙ્નિશ્ચયતત્ત્વજ્ઞઃ, સ્થિરીકુર્વીત સાત્ત્વિકઃ ॥૨॥
અશુભં વા શુભં વાપિ, સ્વસ્વકર્મફલોદયમ્।
ભુઞ્જાનાનાં હિ જીવાનાં, હર્તા કર્તા ન કશ્ચન ॥૩॥
મૃતપ્રાયં યદા ચિત્તં, મૃતપ્રાયં યદા વપુઃ।
મૃતપ્રાયં યદાઽક્ષાણાં, વૃન્દં પક્વં તદા સુખમ્ ॥૪॥
આજન્માજ્ઞાનચેષ્ટાઃ સ્વા, નિન્દ્યાસ્તાઃ પ્રાકૃતૈરપિ।
વિચિન્ત્ય મૂઢ! વૈદગ્ધ્ય,-ગર્વં કુર્વન્ન લજ્જસે ॥૫॥
નિરુન્ધ્યચ્ચિત્તદુર્ધ્યાન, નિરુન્ધ્યાદયતં વચઃ।
નિરુન્ધ્યાત્ કાયચાપલ્યં, તત્ત્વતલ્લીનમાનસઃ ॥૬॥
દિનાતિવાહિકાં કષ્ટાં, દૃષ્ટ્વા બન્ધ્યાદિદુઃખિનામ્।
રુદ્ધમેકાન્તમૌનાભ્યાં, તપંશ્ચિત્તં સ્થિરીકુરુ ॥૭॥
મુનિના મસૃણં શાન્તં, પ્રાઞ્જલં મધુરં મૃદુ।
વદતા તાપલેશોઽપિ, ત્યાજ્યઃ સ્વસ્ય પરસ્ય ચ ॥૮॥
કોમલાપિ સુસામ્યાપિ, વાણી ભવતિ કર્કશા।
અપ્રાઞ્જલાસ્ફુટાત્યર્થં, વિદગ્ધા ચર્વિતાક્ષરા ॥૯॥
ઔચિત્યં યે વિજાનન્તિ, સર્વકાર્યેષુ સિદ્ધિદમ્।
સર્વપ્રિયંકરા યે ચ, તે નરા વિરલા જને ॥૧૦॥
ઔચિત્યં પરમો બન્ધુ,-રૌચિત્યં પરમં સુખમ્।
ધર્માદિમૂલમૌચિત્ય,-મૌચિત્યં જનમાન્યતા ॥૧૧॥
કર્મબન્ધદૃઢશ્લેષં, સર્વસ્યાપ્રીતિકં સદા।
ધર્માર્થિના ન કર્તવ્યં, વીરેણ જટિનિ યથા ॥૧૨॥
બીજભૂતં સુધર્મસ્ય, સદાચારપ્રવર્તનમ્।
સદાચારં વિના સ્વૈરિ,-ણ્યુપવાસનિભો હિ સઃ ॥૧૩॥
મૂર્તો ધર્મઃ સદાચારઃ, સદાચારોઽક્ષયો નિધિઃ।
દૃઢં ધૈર્યં સદાચારઃ, સદાચારઃ પરં યશઃ ॥૧૪॥
લોભમુન્મૂલયન્મૂલા,-દપ્રમત્તો મુનિઃ સદા।
ક્ષાયોપશમિકે ભાવે, સ્થિતોઽનુત્સુકતાં વ્રજેત્ ॥૧૫॥
સંસારસરણિર્લોભો, લોભઃ શિવપથાચલઃ।
સર્વદુઃખખનિર્લોભો, લોભો વ્યસનમન્દિરમ્ ॥૧૬॥
શોકાદીનાં મહાકન્દો, લોભઃ ક્રોધાનલાનિલઃ।
માયાવલ્લિસુધાકુલ્યા, માનમત્તેભવારુણી ॥૧૭॥
ત્રિલોક્યામપિ યે દોષા,-સ્તે સર્વે લોભસંભવાઃ।
ગુણાસ્તથૈવ યે કેઽપિ, તે સર્વે લોભવર્જનાત્ ॥૧૮॥
નૈરપેક્ષ્યાદનૌત્સુક્ય,-મનૌત્સુક્યાચ્ચ સુસ્થતા।
સુસ્થતા ચ પરાનન્દ-, સ્તદપેક્ષાં ક્ષયેદ્ મુનિઃ ॥૧૯॥
અધર્મો જિહ્મતા યાવદ્, ધર્મઃ સ્યાદ્ યાવદાર્જવમ્।
અધર્મધર્મયોરેતદ્, દ્વયમાદિમકારણમ્ ॥૨૦॥
સુખમાર્જવશીલત્વં, સુખં નીચૈશ્ચ વર્તનમ્।
સુખમિન્દ્રિયસંતોષઃ, સુખં સર્વત્ર મૈત્ર્યકમ્ ॥૨૧॥
સંતુષ્ટં સરલં સોમં, નમ્રં તં કૂરગડ્ડુકમ્।

ધ્યાયન્ મુનિં સદા ચિત્તે, કો ન સ્યાચ્ચન્દ્રનિર્મલઃ? ॥૨૨॥
સુકુમારસુરૂપેણ, શાલિભદ્રેણ ભોગિના।
તથા તપ્તં તપો ધ્યાયન્, ન ભવેત્ કસ્તપોરતઃ? ॥૨૩॥
કિં ન ચેતયસે મૂઢ?, મૃત્યુકાલેઽપ્યુપસ્થિતે।
વિષયેષુ મનો યત્તે, ધાવત્યેવ નિરઙ્કુશમ્ ॥૨૪॥
જીવિતે ગતશેષેઽપિ, વિષયેચ્છાં વિયોજ્ય તે।
ચેત્ તપઃ પ્રગુણં ચેત-, સ્તતઃ કિઞ્ચિદ્ ન હારિતમ્ ॥૨૫॥
કૂટજન્માવતારં સ્વં, પાપોપાયૈશ્ચ સંકુલમ્।
વ્યર્થં નીત્વા બતાદ્યાપિ, ધર્મે ચિત્તં સ્થિરીકુરુ ॥૨૬॥
અનન્તાન્ પુદ્ગલાવર્તાન્,-નાત્મન્નેકેન્દ્રિયાદિષુ।
ભ્રાન્તોઽસિ ચ્છેદભેદાદિ,-વેદનાભિરભિદ્રુતઃ ॥૨૭॥
સામ્પ્રતં તુ દૃઢીભૂય, સર્વદુઃખવાનલમ્।
વ્રતદુઃખં કિયત્કાલં, સહ મા મા વિષીદ ભોઃ ॥૨૮॥
ઉપદેશાદિના કિંચિત્, કથંચિત્ કાર્યતે પરઃ।
સ્વાત્મા તુ સ્વહિતે યોક્તું, મુનીન્દ્રૈરપિ દુષ્કરઃ ॥૨૯॥
યદા દુઃખં સુખત્વેન, દુઃખત્વેન સુખં યદા।
મુનિર્વેત્તિ તદા તસ્ય, મોક્ષલક્ષ્મીઃ સ્વયંવરા ॥૩૦॥
સર્વં વાસનયા દુઃખં, સુખં વા પરમાર્થતઃ।
મ્લાયત્યસ્ત્રેક્ષણેઽપ્યેકો, હતોઽપ્યન્યસ્તુ તુષ્યતિ ॥૩૧॥
સુખમગ્નો યથા કોઽપિ, લીનઃ પ્રેક્ષણકાદિષુ।
ગતં કાલં ન જાનાતિ, તથા યોગી પરેઽક્ષરે ॥૩૨॥
મૃગમિત્રો યથો યોગી, વનવાસસુખે રતઃ।
તથા વિષયશર્મેચ્છા,-મૃગતૃષ્ણા વિલીયતે ॥૩૩॥
વને શાન્તઃ સુખાસીનો, નિર્દ્વન્દ્વો નિષ્પરિગ્રહઃ।
પ્રાપ્નોતિ યત્સુખં યોગી, સાર્વભૌમોઽમિ તત્કુતઃ ॥૩૪॥
જન્મભૂત્વાત્ પુલિન્દાનાં, વનવાસે યથા રતિઃ।
તથા વિદિતતત્ત્વાનાં, યદિ સ્યાત્ કિમતઃ પરમ્ ॥૩૫॥
એકો ગર્ભસ્થિતો જાત, એક એકો વિનઙ્ક્ષ્યસિ।
તથાપિ મૂઢ! પત્ન્યાદીન્, કિં મમત્વેન પશ્યસિ? ॥૩૬॥
પાપં કૃત્વા સ્વતો ભિન્નં, કુટુમ્બં પોષિતં ત્વયા।
દુઃખં સહિષ્યસે તેન ભ્રાન્તોઽસિ હા મહાન્તરે? ॥૩૭॥
ચલં સર્વં ક્ષણાદ્ વસ્તુ, દૃશ્યતેઽથ ન દૃશ્યતે।
અજરામરવત્ પાપં, તથાપિ કુરુષે કથમ્ ॥૩૮॥
સપ્તધાતુમયે શ્લેષ્મ,-મૂત્રાદ્યશુચિપૂરિતે।
શરીરકેઽપિ પાપાય, કોઽયં શૌચાગ્રહસ્તવ? ॥૩૯॥
શારીરમાનસૈર્દુઃખે,-ર્બહુધા બહુદેહિનઃ।
સંયોજ્ય સામ્પ્રતં જીવ!, ભવિષ્યસિ કથં સ્વયમ્ ॥૪૦॥
ધર્મં ન કુરુષે મૂર્ખ!, પ્રમાદસ્ય વશંવદઃ।
કલ્યે હિ ત્રાસ્યતે કસ્ત્વાં, નરકે દુઃખવિહ્વલમ્ ॥૪૧॥
કન્ધરાબદ્ધપાપાશ્મા, ભવાબ્ધૌ યદ્યધોગતઃ।
ક્વ ધર્મરજ્જુસંપ્રાપ્તિઃ, પુનરુચ્છલનાય તે ॥૪૨॥
દુઃખકૂપેઽત્ર સંસારે, સુખલેશભ્રમોઽપિ યઃ।
સોઽપિ દુઃખસહસ્રેણા-નુવિદ્ધોઽતઃ કુતઃ સુખમ્? ॥૪૩॥
દુઃખિતાનખિલાઞ્જન્તૂન્, પશ્યતીહ યથા યથા।
તથા તથા ભવસ્યાસ્ય, વિશુદ્ધાત્મા વિરજ્યતિ ॥૪૪॥
સંસારાવર્તનિર્મગ્નો, ઘૂર્ણમાનો વિચેતનઃ।

અધ એવ જનો યાતિ, નિકટેઽપિ તટે હહા ॥૪૫॥
તિર્યગ્ગોઽયં યથાચ્છિન્દન્, નદ્યાઃ સ્યાત્ પારગઃ સુધીઃ।
ભવસ્યાપિ તથોત્સર્ગા,-પવાદકુશલો મુનિઃ ॥૪૬॥
એભિઃ સર્વાત્મના ભાવૈ,-ર્ભાવિતાત્મા શુભાશયઃ।
કામાર્થવિમુખઃ શૂરઃ, સુધર્મૈકરતિર્ભવેત્ ॥૪૭॥
ઇતિ તત્ત્વોપદેશૌઘ-ક્ષાલિતામલમાનસઃ।
નિર્દ્વન્દ્વ ઉચિતાચારઃ, સર્વસ્યાનન્દદાયકઃ ॥૪૮॥
સ્વસ્વરૂપસ્થિતઃ પીત્વા, યોગી યોગરસાયનમ્।
નિઃશેષક્લેશનિર્મુક્તં, પ્રાપ્નોતિ પરમં પદમ્ ॥૪૯॥

**પૂર્વાચાર્યશ્રીસોમપ્રભસૂરિરચિતઃ**

## સિન્દૂર-પ્રકરઃ

સિન્દૂરપ્રકરસ્તપઃકરિશિરઃક્રોડે કષાયાઽટવી,-
દાવાર્ચિર્નિચયઃ પ્રબોધદિવસ-પ્રારમ્ભ-સૂર્યોદયઃ।
મુક્તિસ્ત્રી-કુચકુમ્ભ-કુઙ્કુમરસઃ શ્રેયસ્તરોઃ પલ્લવ,-
પ્રોલ્લાસઃ ક્રમયોર્નખદ્યુતિભરઃ પાર્શ્વપ્રભોઃ પાતુ વઃ ॥૧॥
સન્તઃ સન્તુ મમ પ્રસન્નમનસો વાચાં વિચારોદ્યતાઃ,
સૂતેઽમ્ભઃ કમલાનિ તત્પરિમલં વાતા વિતન્વન્તિ યત્।
કિંવાભ્યર્થનયાનયા યદિ ગુણોઽસ્ત્યાસાં તતસ્તે સ્વયં,
કર્ત્તારઃ પ્રથનં ન ચેદથ યશઃપ્રત્યર્થિના તેન કિમ્ ॥૨॥
ત્રિવર્ગ-સંસાધન-મન્તરેણ,
પશોરિવાયુર્વિફલં નરસ્ય।
તત્રાઽપિ ધર્મં પ્રવરં વદન્તિ,
ન તં વિના યદ્ભવતોઽર્થકામૌ ॥૩॥
યઃ પ્રાપ્ય દુષ્પ્રાપમિદં નરત્વં,
ધર્મં ન યત્નેન કરોતિ મૂઢઃ।
ક્લેશપ્રબન્ધેન સ લબ્ધમબ્ધૌ,
ચિન્તામણિં પાતયતિ પ્રમાદાત્ ॥૪॥
સ્વર્ણસ્થાલે, ક્ષિપતિ સ રજઃ પાદશૌચં વિધત્તે,
પીયૂષેણ પ્રવરકરિણં વાહયત્યૈન્ધભારમ્।
ચિન્તારત્નં વિકિરતિ કરાદ્વાયસોડ્ડાયનાર્થં-
યો દુષ્પ્રાપં ગમયતિ મુધા મર્ત્યજન્મ પ્રમત્તઃ ॥૫॥
તે ધત્તૂરતરું વપન્તિ ભવને, પ્રોન્મૂલ્ય કલ્પદ્રુમં,
ચિન્તારત્નમપાસ્ય કાચશકલં સ્વીકુર્વતે તે જડાઃ।
વિક્રીય દ્વિરદં ગિરીન્દ્રસદૃશં ક્રીણન્તિ તે રાસભં,
યે લબ્ધં પરિહૃત્ય ધર્મમધમા ધાવન્તિ ભોગાશયા ॥૬॥
અપારે સંસારે, કથમપિ સમાસાદ્ય નૃભવં,
ન ધર્મં યઃ કુર્યાદ્વિષયસુખ-તૃષ્ણા-તરલિતઃ।
બ્રુડન્ પારાવારે પ્રવરમપહાય પ્રવહણં,
સ મુખ્યો મૂર્ખાણામુપલમુપલબ્ધું પ્રયતતે ॥૭॥
ભક્તિં તીર્થકરે ગુરૌ જિનમતે સંઘે ચ હિંસાઽનૃત-,
સ્તેયાબ્રહ્મ-પરિગ્રહાદ્યુપરમં ક્રોધાદ્યરીણાં જયમ્।
સૌજન્યં ગુણિસઙ્ગમિન્દ્રિયદમં દાનં તપો ભાવનાં,
વૈરાગ્યં ચ કુરુષ્વ નિર્વૃતિપદે યદ્યસ્તિ ગન્તું મનઃ ॥૮॥
પાપં લુમ્પતિ દુર્ગતિં દલયતિ વ્યાપાદયત્યાપદં,
પુણ્યં સંચિનુતે શ્રિયં વિતનુતે પુષ્ણાતિ નીરોગતામ્।

સૌભાગ્યં વિદધાતિ પલ્લવયતિ પ્રીતિં પ્રસૂતે યશઃ,
સ્વર્ગં યચ્છતિ નિર્વૃતિં ચ રચયત્યર્ચાર્હતાં નિર્મિતા ॥૯॥
સ્વર્ગસ્તસ્ય ગૃહાઙ્ગણં સહચરી સામ્રાજ્યલક્ષ્મીઃ શુભા,
સૌભાગ્યાદિ-ગુણાવલિર્વિલસતિ સ્વૈરં વપુર્વેશ્મનિ।
સંસારઃ સુતરઃ શિવં કરતલ-ક્રોડે લુઠત્યઞ્જસા,
યઃ શ્રદ્ધાભર-ભાજનં જિનપતેઃ પૂજાં વિધત્તે જનઃ ॥૧૦॥
કદાચિન્નાતઙ્કઃ કુપિત ઇવ પશ્યત્યભિમુખં,
વિદૂરે દારિદ્ર્યં ચકિતમિવ નશ્યત્યનુદિનમ્।
વિરક્તા કાન્તેવ ત્યજતિ કુગતિઃ સઙ્ગમુદયો,
ન મુઞ્ચત્યભ્યર્ણં સુહૃદિવ જિનાર્ચાં રચયતઃ ॥૧૧॥
યઃ પુષ્પૈર્જિનમર્ચતિ સ્મિતસુરસ્ત્રીલોચનૈઃ સોઽર્ચ્યતે,
યસ્તં વન્દત એકશસ્ત્રિજગતા સોઽહર્નિશં વન્દ્યતે।
યસ્તં સ્તૌતિ પરત્ર વૃત્રદમનસ્તોમેન સ સ્તૂયતે,
યસ્તં ધ્યાયતિ ક્લૃપ્તકર્મનિધનઃ સ ધ્યાયતે યોગિભિઃ ॥૧૨॥
અવદ્યમુક્તે પથિ યઃ પ્રવર્તતે,
પ્રવર્ત્તયત્યન્યજનં ચ નિઃસ્પૃહઃ।
સ એવ સેવ્યઃ સ્વહિતૈષિણા ગુરુઃ,
સ્વયં તરંસ્તારયિતું ક્ષમઃ પરમ્ ॥૧૩॥
વિદલયતિ કુબોધં બોધયત્યાગમાર્થં,
સુગતિકુગતિમાર્ગૌ પુણ્યપાપે વ્યનક્તિ।
અવગમયતિ કૃત્યાકૃત્યભેદં ગુરુર્યો,
ભવજલનિધિપોતસ્તં વિના નાઽસ્તિ કશ્ચિત્ ॥૧૪॥
પિતા માતા ભ્રાતા, પ્રિયસહચરી સૂનુનિવહઃ,
સુહૃત્સ્વામી માદ્યત્કરિભટરથાશ્વઃ પરિકરઃ।
નિમજ્જન્તં જન્તું નરકકુહરે રક્ષિતુમલં,
ગુરોર્ધર્માઽધર્મપ્રકટનપરાત્કોઽપિ ન પરઃ ॥૧૫॥
કિં ધ્યાનેન ભવત્વશેષવિષય-ત્યાગૈસ્તપોભિઃ કૃતં,
પૂર્ણં ભાવનયાઽલમિન્દ્રિયદમૈઃ પર્યાપ્તમાપ્તાગમૈઃ।
કિં ત્વેકં ભવનાશનં કુરુ ગુરુપ્રીત્યા ગુરોઃ શાસનં,
સર્વે યેન વિના વિનાથબલવત્ સ્વાર્થાય નાઽલં ગુણાઃ ॥૧૬॥
ન દેવં નાદેવં ન શુભગુરુમેવં ન કુગુરું,
ન ધર્મં નાઽધર્મં ન ગુણપરિણદ્ધં ન વિગુણમ્।
ન કૃત્યં નાઽકૃત્યં ન હિતમહિતં નાપિ નિપુણં,
વિલોકન્તે લોકા જિનવચનચક્ષુર્વિરહિતાઃ ॥૧૭॥
માનુષ્યં વિફલં વદન્તિ હૃદયં વ્યર્થં વૃથા શ્રોત્રયો-,
ર્નિર્માણં ગુણદોષભેદકલનાં તેષામસંભાવિનીમ્।
દુર્વારં નરકાન્ધકૂપપતનં મુક્તિં બુધા દુર્લભાં,
સાર્વજ્ઞઃ સમયો દયારસમયો યેષાં ન કર્ણાતિથિઃ ॥૧૮॥
પીયૂષં વિષવજ્જલં જ્વલનવત્તેજસ્તમઃસ્તોમવ-
ન્મિત્રં શાત્રવવત્ સ્રજં ભુજગવચ્ચિન્તામણિં લોષ્ઠવત્।
જ્યોત્સ્નાં ગ્રીષ્મજઘર્મવત્ સ મનુતે કારુણ્યપણ્યાપણં,

જૈનેન્દ્રં મતમન્યદર્શનસમં યો દુર્મતિર્મન્યતે ॥૧૯॥
ધર્મં જાગરયત્યઘં વિઘટયત્યુત્થાપયત્યુત્પથં,
ભિન્તે મત્સરમુચ્છિનત્તિ કુનયં મથ્નાતિ મિથ્યામતિમ્।
વૈરાગ્યં વિતનોતિ પુષ્યતિ કૃપાં મુષ્ણાતિ તૃષ્ણાં ચ ય-
ત્તજ્જૈનં મતમર્ચતિ પ્રથયતિ ધ્યાયત્યધીતે કૃતી ॥૨૦॥
રત્નાનામિવ રોહણ-ક્ષિતિધરઃ ખં તારકાણામિવ,
સ્વર્ગઃ કલ્પમહીરુહામિવ સરઃ પઙ્કેરુહાણામિવ।
પાથોધિઃ પયસામિવેન્દુમહસાં સ્થાનં ગુણાનામસા-
વિત્યાલોચ્ય વિરચ્યતાં ભગવતઃ સંઘસ્ય પૂજાવિધિઃ ॥૨૧॥
યઃ સંસાર-નિરાસ-લાલસ-મતિર્મુક્ત્યર્થમુત્તિષ્ઠતે,
યં તીર્થં કથયન્તિ પાવનતયા યેનાઽસ્તિ નાઽન્યઃ સમઃ।
યસ્મૈ તીર્થપતિર્નમસ્યતિ સતાં યસ્માચ્છુભં જાયતે,
સ્ફૂર્તિર્યસ્ય પરા વસન્તિ ચ ગુણા યસ્મિન્સ સંઘોઽર્ચ્યતામ્ ॥૨૨॥
લક્ષ્મીસ્તં સ્વયમભ્યુપૈતિ રભસા કીર્ત્તિસ્તમાલિઙ્ગતિ,
પ્રીતિસ્તં ભજતે મતિઃ પ્રયતતે તં લબ્ધુમુત્કણ્ઠયા।
સ્વઃશ્રીસ્તં પરિરબ્ધુમિચ્છતિ મુહુર્મુક્તિસ્તમાલોકતે,
યઃ સંઘં ગુણરાશિકેલિસદનં શ્રેયોરુચિઃ સેવતે ॥૨૩॥
યદ્ભક્તેઃ ફલમર્હદાદિપદવીમુખ્યં કૃષેઃ શસ્યવત્,
ચક્રિત્વં ત્રિદશેન્દ્રતાદિ તૃણવત્ પ્રાસઙ્ગિકં ગીયતે।
શક્તિં યન્મહિમસ્તુતૌ ન દધતે વાચોઽપિ વાચસ્પતેઃ,
સંઘઃ સોઽઘહરઃ પુનાતુ ચરણન્યાસૈઃ સતાં મન્દિરમ્ ॥૨૪॥
ક્રીડાભૂઃ સુકૃતસ્ય દુષ્કૃતરજઃસંહારવાત્યા ભવો-
દન્વન્નૌર્વ્યસનાગ્નિમેઘપટલી સંકેતદૂતી શ્રિયામ્।
નિઃશ્રેણિસ્ત્રિદિવૌકસઃ પ્રિયસખી મુક્તેઃ કુગત્યર્ગલા,
સત્ત્વેષુ ક્રિયતાં કૃપૈવ ભવતુ ક્લેશૈરશેષૈઃ પરૈઃ ॥૨૫॥
યદિ ગ્રાવા તોયે તરતિ તરણિર્યદ્યુદયતિ,
પ્રતીચ્યાં સપતાર્ચિર્યદિ ભજતિ શૈત્યં કથમપિ।
યદિ ક્ષ્માપીઠં સ્યાદુપરિ સકલસ્યાઽપિ જગતઃ,
પ્રસૂતે સત્ત્વાનાં તદપિ ન વધઃ ક્વાઽપિ સુકૃતમ્ ॥૨૬॥
સ કમલવનમગ્નેર્વાસરં ભાસ્વદસ્તા-
દમૃતમુરગવક્ત્રાત્સાધુવાદં વિવાદાત્।
રુગપગમમજીર્ણાજ્જીવિતં કાલકૂટા-
દભિલષતિ વધાદ્યઃ પ્રાણિનાં ધર્મમિચ્છેત્ ॥૨૭॥
આયુર્દીર્ઘતરં વપુર્વતરતરં ગોત્રં ગરીયસ્તર,
વિત્તં ભૂરિતરં બલં બહુતરં સ્વામિત્વમુચ્ચૈસ્તરમ્।
આરોગ્યં વિગતાન્તરં ત્રિજગતિ શ્લાઘ્યત્વમલ્પેતરં,
સંસારામ્બુનિધિં કરોતિ સુતરં ચેતઃ કૃપાર્દ્રાન્તરમ્ ॥૨૮॥
વિશ્વાસાયતનં વિપત્તિદલનં દેવૈઃ કૃતારાધનં,
મુક્તેઃ પથ્યદનં જલાગ્નિશમનં વ્યાઘ્રોરગ-સ્તંભનમ્।
શ્રેયઃસંવનનં સમૃદ્ધિજનનં સૌજન્ય-સંજીવનં,
કીર્ત્તેઃ કેલિવનં પ્રભાવભવનં સત્યં વચઃ પાવનમ્ ॥૨૯॥
યશો યસ્માદ્ ભસ્મીભવતિ વનવહ્નેરિવ વનં,

નિદાનં દુઃખાનાં યદવનિરુહાણાં જલમિવ।
ન યત્ર સ્યાચ્છાયાઽઽતપ ઇવ તપઃસંયમકથા,
કથંચિત્તન્મિથ્યા વચનમભિધત્તે ન મતિમાન્ ॥૩૦॥
અસત્યમપ્રત્યયમૂલકારણં,
કુવાસનાસદ્મ સમૃદ્ધિવારણમ્।
વિપન્નિદાનં પરવઞ્ચનોર્જિતં,
કૃતાપરાધં કૃતિભિર્વિવર્જિતમ્ ॥૩૧॥
તસ્યાઽગ્નિર્જલમર્ણવઃ સ્થલમરિર્મિત્રં સુરાઃ કિંકરાઃ,
કાન્તારં નગરં ગિરિર્ગૃહમહિર્માલ્યં મૃગારિર્મૃગઃ।
પાતાલં બિલમસ્ત્રમુત્પલદલં વ્યાલઃ શૃગાલો વિષં,
પીયૂષં વિષમં સમં ચ વચનં સત્યાઞ્ચિતં વક્તિ યઃ ॥૩૨॥
તમભિલષતિ સિદ્ધિસ્તં વૃણીતે સમૃદ્ધિ-
સ્તમભિસરતિ કીર્તિર્મુઞ્ચતે તં ભવાર્ત્તિઃ।
સ્પૃહયતિ સુગતિસ્તં નેક્ષતે દુર્ગતિસ્તં,
પરિહરતિ વિપત્તં યો ન ગૃહ્ણાત્યદત્તમ્ ॥૩૩॥
અદત્તં નાઽઽદત્તે કૃતસુકૃતકામઃ કિમપિ યઃ
શુભશ્રેણિસ્તસ્મિન્ વસતિ કલહંસીવ કમલે।
વિપત્તસ્માદ્ દૂરં વ્રજતિ રજનીવામ્બરમણે-
ર્વિનીતં વિદ્યેવ ત્રિદિવશિવલક્ષ્મીર્ભજતિ તમ્ ॥૩૪॥
યન્નિર્વર્તિતકીર્તિધર્મનિધનં સર્વાગસાં સાધનં,
પ્રોન્મીલદ્વધબન્ધનં વિરચિતક્લિષ્ટાશયોદ્બોધનમ્।
દૌર્ગત્યૈકનિબન્ધનં કૃતસુગત્યાશ્લેષસંરોધનમ્,
પ્રોત્સર્પત્પ્રધનં જિઘૃક્ષતિ ન તદ્ ધીમાનદત્તં ધનમ્ ॥૩૫॥
પરજનમનઃપીડાક્રીડાવનં વધભાવના-
ભવનમવનિવ્યાપિવ્યાપલ્લતાઘનમણ્ડલમ્।
કુગતિગમને માર્ગઃ સ્વર્ગાપવર્ગપુરાર્ગલં,
નિયતમનુપાદેયં સ્તેયં નૃણાં હિતકાઙ્ક્ષિણામ્ ॥૩૬॥
દત્તસ્તેન જગત્યકીર્તિપટહો ગોત્રે મષીકૂર્ચક-,
શ્ચારિત્રસ્ય જલાઞ્જલિર્ગુણગણારામસ્ય દાવાનલઃ।
સંકેતઃ સકલાપદાં શિવપુરદ્વારે કપાટો દૃઢઃ,
કામાર્ત્તસ્ત્યજતિ પ્રબોધયતિ વા સ્વસ્ત્રીં પરસ્ત્રીં ન યઃ ॥૩૭॥
વ્યાઘ્રવ્યાલજલાનલાદિવિપદસ્તેષાં વ્રજન્તિ ક્ષયં,
કલ્યાણાનિ સમુલ્લસન્તિ વિબુધાઃ સાન્નિધ્યમધ્યાસતે।
કીર્તિઃ સ્ફૂર્તિમિયર્તિ યાત્યુપચયં ધર્મઃ પ્રણશ્યત્યઘં,
સ્વર્નિર્વાણસુખાનિ સંનિદધતે યે શીલમાબિભ્રતે ॥૩૮॥
હરતિ કુલકલઙ્કં લુમ્પતે પાપપઙ્કં,
સુકૃતમુપચિનોતિ શ્લાઘ્યતામાતનોતિ।
નમયતિ સુરવર્ગં હન્તિ દુર્ગોપસર્ગં,
રચયતિ શુચિ શીલં સ્વર્ગમોક્ષૌ સલીલમ્ ॥૩૯॥
તોયત્યગ્નિરપિ સ્રજત્યહિરપિ વ્યાઘ્રોઽપિ સારઙ્ગતિ,
વ્યાલોઽપ્યશ્વતિ પર્વતોઽપ્યુપલતિ ક્ષ્વેડોઽપિ પીયૂષતિ।
વિઘ્નોઽપ્યુત્સવતિ પ્રિયત્યરિરપિ ક્રીડાતડાગત્યપાં,-
નાથોઽપિ સ્વગૃહત્યટવ્યપિ નૃણાં શીલપ્રભાવાદ્ ધ્રુવમ્ ॥૪૦॥
કાલુષ્યં જનયન્ જડસ્ય રચયન્ ધર્મદ્રુમોન્મૂલનં,
ક્લિશ્યન્નીતિકૃપાક્ષમાકમલિની-ર્લોભામ્બુધિ વર્દ્ધયન્।
મર્યાદાતટમુદ્રુજન્ શુભમનો-હંસપ્રવાસં દિશન્,

કિં ન ક્લેશકરઃ પરિગ્રહનદીપૂરઃ પ્રવૃદ્ધિં ગતઃ ॥૪૧॥
કલહકલભવિન્ધ્યઃ ક્રોધગૃધ્રશ્મશાનં,
વ્યસનભુજગરન્ધ્રં દ્વેષદસ્યુપ્રદોષઃ।
સુકૃતવનદવાગ્નિર્માર્દવામ્ભોદવાયુ-
ર્નયનલિનતુષારોऽત્યર્થમર્થાનુરાગઃ ॥૪૨॥
પ્રત્યર્થી પ્રશમસ્ય મિત્રમધૃતેર્મોહસ્ય વિશ્રામભૂઃ,
પાપાનાં ખનિરાપદાં પદમસદ્ધ્યાનસ્ય લીલાવનમ્।
વ્યાક્ષેપસ્ય નિધિર્મદસ્ય સચિવઃ શોકસ્ય હેતુઃ કલેઃ,
કેલીવેશ્મ પરિગ્રહઃ પરિહૃતેર્યોગ્યો વિવિક્તાત્મનામ્ ॥૪૩॥
વહ્નિસ્તૃપ્યતિ નેન્ધનૈરિહ યથા નામ્ભોભિરમ્ભોનિધિ,-
સ્તદ્વન્મોહઘનો ઘનૈરપિ ધનૈર્જન્તુર્ન સંતુષ્યતિ।
ન ત્વેવં મનુતે વિમુચ્ય વિભવં નિઃશેષમન્યં ભવં,
યાત્યાત્મા તદહં મુધૈવ વિદધામ્યેનાંસિ ભૂયાંસિ કિમ્ ॥૪૪॥
યો મિત્રં મધુનો વિકાર-કરણે સંત્રાસ-સંપાદને,
સર્પસ્ય પ્રતિબિમ્બમઙ્ગદહને સપ્તાર્ચિષઃ સોદરઃ।
ચૈતન્યસ્ય નિષૂદને વિષતરોઃ સબ્રહ્મચારી ચિરં,
સ ક્રોધઃ કુશલાભિલાષકુશલૈઃ પ્રોન્મૂલમુન્મૂલ્યતામ્ ॥૪૫॥
ફલતિ કલિત-શ્રેયઃશ્રેણિ-પ્રસૂનપરંપરઃ,
પ્રશમપયસા સિક્તો મુક્તિં તપશ્ચરણદ્રુમઃ।
યદિ પુનરસૌ પ્રત્યાસત્તિં પ્રકોપહવિર્ભુજો,
ભજતિ લભતે ભસ્મીભાવં તદા વિફલોદયઃ ॥૪૬॥
સંતાપં તનુતે ભિનત્તિ વિનયં સૌહાર્દમુત્સાદય-
ત્યુદ્વેગં જનયત્યવદ્યવચનં સૂતે વિધત્તે કલિમ્।
કીર્તિં કૃન્તતિ દુર્મતિં વિતરતિ વ્યાહન્તિ પુણ્યોદયં,
દત્તે યઃ કુગતિં સ હાતુમુચિતો રોષઃ સદોષઃ સતામ્ ॥૪૭॥
યો ધર્મં દહતિ દ્રુમં દવ ઇવોન્મથ્નાતિ નીતિં લતાં,
દન્તીવેન્દુકલાં વિધુંતુદ ઇવ ક્લિશ્નાતિ કીર્તિં નૃણામ્।
સ્વાર્થં વાયુરિવામ્બુદં વિઘટયત્યુલ્લાસયત્યાપદં,
તૃષ્ણાં ધર્મ ઇવોચિતઃ કૃતકૃપાલોપઃ સ કોપઃ કથમ્ ॥૪૮॥
યસ્માદાવિ-ર્ભવતિ વિતતિ-ર્દુસ્તરાપન્નદીનાં,
યસ્મિન્ શિષ્ટાભિરુચિતગુણ-ગ્રામનામાપિ નાસ્તિ।
યશ્ચ વ્યાપ્તં વહતિ વધધી-ધૂમ્યયા ક્રોધદાવં,
તં માનાદ્રિં પરિહર દુરારોહમૌચિત્યવૃત્તેઃ ॥૪૯॥
શમાલાનં ભઞ્જન્, વિમલમતિનાડીં વિઘટયન્,
કિરન્ દુર્વાક્-પાંશૂત્કરમગણયન્નાગમસૃણિમ્।
ભ્રમન્નૂર્વ્યાં સ્વૈરં વિનયનયવીથીં વિદલયન્,
જનઃ કં નાऽનર્થં જનયતિ મદાન્ધો દ્વિપ ઇવ ॥૫૦॥
ઔચિત્યાચરણં વિલુમ્પતિ પયોવાહં નભસ્વાનિવ,
પ્રધ્વંસં વિનયં નયત્યહિરિવ પ્રાણસ્પૃશાં જીવિતમ્।
કીર્તિં કૈરવિણીં મતઙ્ગજ ઇવ પ્રોન્મૂલયત્યઞ્જસા,
માનો નીચ ઇવોપકારનિકરં હન્તિ ત્રિવર્ગં નૃણામ્ ॥૫૧॥
મુષ્ણાતિ યઃ કૃતસમસ્તસમીહિતાર્થ-
સંજીવનં વિનય-જીવિતમઙ્ગભાજામ્।
જાત્યાદિમાન-વિષજં વિષમં વિકારં,
તં માર્દવામૃતરસેન નયસ્વ શાન્તિમ્ ॥૫૨॥
કુશલ-જનન-વન્ધ્યાં, સત્ય-સૂર્યાસ્ત-સન્ધ્યાં,

કુગતિયુવતિમાલાં, મોહમાતઙ્ગ-શાલામ્।
શમ-કમલ-હિમાનીં દુર્યશો-રાજધાનીં,
વ્યસનશત-સહાયાં દૂરતો મુઞ્ચ માયામ્ ॥૫૩॥
વિધાય માયાં વિવિધૈરુપાયૈઃ,
પરસ્ય યે વઞ્ચનમાચરન્તિ।
તે વઞ્ચયન્તિ ત્રિદિવાપવર્ગ-
સુખાન્મહામોહસખાઃ સ્વમેવ ॥૫૪॥
માયામવિશ્વાસ-વિલાસમન્દિરં,
દુરાશયો યઃ કુરુતે ધનાશયા।
સોઽનર્થસાર્થં ન પતન્તમીક્ષતે,
યથા બિડાલો લગુડં પયઃ પિબન્ ॥૫૫॥
મુગ્ધપ્રતારણપરાયણમુજ્જિહીતે,
યત્પાટવં કપટલમ્પટચિત્તવૃત્તેઃ।
જીર્યત્યુપપ્લવમવશ્યમિહાઽપ્યકૃત્વા,
નાઽપથ્યભોજનમિવામય-માયતૌ તત્ ॥૫૬॥
યદ્દુર્ગામટવીમટન્તિ વિકટં ક્રામન્તિ દેશાન્તરં,
ગાહન્તે ગહનં સમુદ્રમતનુ-ક્લેશાં કૃષિં કુર્વતે।
સેવન્તે કૃપણં પતિં ગજઘટા-સંઘટ્ટદુઃસંચરં,
સર્પન્તિ પ્રધનં ધનાન્ધિતધિયસ્તલ્લોભવિસ્ફૂર્જિતમ્ ॥૫૭॥
મૂલં મોહવિષદ્રુમસ્ય સુકૃતામ્ભોરાશિકુમ્ભોદ્ભવઃ,
ક્રોધાગ્નેરરણિઃ પ્રતાપતરણિ-પ્રચ્છાદને તોયદઃ।
ક્રીડાસદ્મ કરેર્વિવેકશશિનઃ સ્વર્ભાનુરાપન્નદી-
સિન્ધુઃ કીર્તિલતાકલાપ-કલભો લોભઃ પરાભૂયતામ્ ॥૫૮॥
નિઃશેષધર્મવનદાહ-વિજૃમ્ભમાણે,
દુઃખૌઘભસ્મનિ વિસર્પદકીર્તિધૂમે।
બાઢં ઘનેન્ધનસમાગમદીપ્યમાને,
લોભાનલે શલભતાં લભતે ગુણૌઘઃ ॥૫૯॥
જાતઃ કલ્પતરુઃ પુરઃ સુરગવી તેષાં પ્રવિષ્ટા ગૃહં,
ચિન્તારત્નમુપસ્થિતં કરતલે પ્રાપ્તો નિધિઃ સંનિધિમ્।
વિશ્વં વશ્યમવશ્યમેવ સુલભાઃ સ્વર્ગાપવર્ગશ્રિયો,
યે સંતોષમશેષદોષદહન-ધ્વંસામ્બુદં બિભ્રતે ॥૬૦॥
વરં ક્ષિપ્તઃ પાણિઃ કુપિતફણિનો વક્ત્રકુહરે,
વરં ઝમ્પાપાતો જ્વલદનલકુણ્ડે વિરચિતઃ।
વરં પ્રાસપ્રાન્તઃ સપદિ જઠરાન્તર્વિનિહિતો,
ન જન્યં દૌર્જન્યં તદપિ વિપદાં સદ્મ વિદુષા ॥૬૧॥
સૌજન્યમેવ વિદધાતિ યશશ્ચયં ચ,
સ્વશ્રેયસં ચ વિભવં ચ ભવક્ષયં ચ।
દૌર્જન્યમાવહસિ યત્ કુમતે તદર્થં,
ધાન્યેઽનલં દિશસિ તજ્જલસેકસાધ્યે ॥૬૨॥
વરં વિભવવન્ધ્યતા, સુજનભાવભાજાં નૃણા-
મસાધુચરિતાર્જિતા ન પુનરુર્જિતાઃ સંપદઃ।
કૃશત્વમપિ શોભતે સહજમાયતૌ સુન્દરં,
વિપાકવિરસા ન તુ શ્વયથુસંભવા સ્થૂલતા ॥૬૩॥
ન બ્રૂતે પરદૂષણં પરગુણં વક્ત્યલ્પમપ્યન્વહં,
સંતોષં વહતે પરર્ધિષુ પરાબાધાસુ ધત્તે શુચમ્।
સ્વશ્લાઘાં ન કરોતિ નોજ્ઝતિ નયં નૌચિત્યમુલ્લઙ્ઘય-

ત્યુક્તોપ્યપ્રિયમક્ષમાં ન રચયત્યેતચ્ચરિત્રં સતામ્ ॥૬૪॥
ધર્મં ધ્વસ્તદયો યશશ્ચ્યુતનયો વિત્તં પ્રમત્તઃ પુમાન્,
કાવ્યં નિષ્પ્રતિભસ્તપઃ શમદયાશૂન્યોઽલ્પમેધાઃ શ્રુતમ્।
વસ્ત્વાલોકમલોચનશ્ચલમના ધ્યાનં ચ વાઞ્છત્યસૌ,
યઃ સઙ્ગં ગુણિનાં વિમુચ્ય વિમતિઃ કલ્યાણમાકાઙ્ક્ષતિ ॥૬૫॥
હરતિ કુમતિં ભિન્ત્તે મોહં કરોતિ વિવેકિતાં,
વિતરતિ રતિં સૂતે નીતિં તનોતિ ગુણાવલિમ્।
પ્રથયતિ યશો ધત્તે ધર્મં વ્યપોહતિ દુર્ગતિં,
જનયતિ નૃણાં કિં નાભીષ્ટં ગુણોત્તમસઙ્ગમઃ ॥૬૬॥
લબ્ધું બુદ્ધિકલાપમાપદમપાકર્ત્તું વિહર્તું પથિ,
પ્રાપ્તું કીર્તિમસાધુતાં વિધુવિતું ધર્મં સમાસેવિતુમ્।
રોદ્ધું પાપવિપાકમાકલયિતું સ્વર્ગાપવર્ગશ્રિયં,
ચેત્ત્વં ચિત્ત! સમીહસે ગુણવતાં સઙ્ગં તદઙ્ગીકુરુ ॥૬૭॥
હિમતિ મહિમામ્ભોજે ચણ્ડાનિલત્યુદયામ્બુદે,
દ્વિરદતિ દયારામે ક્ષેમક્ષમાભૃતિ વજ્રતિ।
સમિધતિ કુમત્યગ્નૌ કન્દત્યનીતિલતાસુ યઃ,
કિમભિલષતા શ્રેયઃ શ્રેયઃ સ નિર્ગુણસઙ્ગમઃ? ॥૬૮॥
આત્માનં કુપથેન નિર્ગમયિતું યઃ શૂકલાશ્વાયતે,
કૃત્યાકૃત્યવિવેકજીવિતહૃતૌ યઃ કૃષ્ણસર્પાયતે।
યઃ પુણ્યદ્રુમખણ્ડખણ્ડનવિધૌ સ્ફૂર્જત્કુઠારાયતે,
તં લુપ્તવ્રતમુદ્રમિન્દ્રિયગણં જિત્વા શુભંયુર્ભવ ॥૬૯॥
પ્રતિષ્ઠાં યન્નિષ્ઠાં નયતિ નયનિષ્ઠાં વિઘટય-
ત્યકૃત્યેષ્વાધત્તે મતિમતપસિ પ્રેમ તનુતે।
વિવેકસ્યોત્સેકં વિદલયતિ દત્તે ચ વિપદં,
પદં તદ્દોષાણાં કરણ-નિકુરમ્બં કુરુ વશે ॥૭૦॥
ધત્તાં મૌનમગારમુજ્ઝતુ વિધિપ્રાગલ્ભ્યમભ્યસ્યતા,-
મસ્ત્વન્તર્ગણમાગમશ્રમમુપાદત્તાં તપસ્તપ્યતામ્।
શ્રેયઃ પુઞ્જનિકુઞ્જભઞ્જનમહાવાતં ન ચેદિન્દ્રિય,-
વ્રાતં જેતુમવૈતિ ભસ્મનિહુતં જાનીત સર્વં તતઃ ॥૭૧॥
ધર્મધ્વંસધુરીણમભ્રમરસાવારીણમાપત્પ્રથા,-
લંકર્મીણમશર્મનિર્મિતિકલાપારીણમેકાન્તતઃ।
સર્વાન્નીનમનાત્મનીનમનયાત્યન્તીનમિષ્ટે યથા,-
કામીનં કુમતાધ્વનીનમજયન્નક્ષૌઘમક્ષેમભાક્ ॥૭૨॥
નિમ્નં ગચ્છતિ નિમ્નગેવ નિતરાં નિદ્રેવ વિષ્કમ્ભતે,
ચૈતન્યં મદિરેવ પુષ્યતિ મદં ધૂમ્યેવ દત્તેઽન્ધતામ્।
ચાપલ્યં ચપલેવ ચુમ્બતિ દવજ્વાલેવ તૃષ્ણાં નય,-
ત્યુલ્લાસં કુલટાઙ્ગનેવ કમલા સ્વૈરં પરિભ્રામ્યતિ ॥૭૩॥
દાયાદાઃ સ્પૃહયન્તિ તસ્કરગણા મુષ્ણન્તિ ભૂમિભુજો,
ગૃહ્ણન્તિ ચ્છલમાકલય્ય હુતભુગ્ભસ્મીકરોતિ ક્ષણાત્।
અમ્ભઃ પ્લાવયતિ ક્ષિતૌ વિનિહિતં યક્ષા હરન્તે હઠાદ્,
દુર્વૃત્તાસ્તનયા નયન્તિ નિધનં ધિગ્બહ્વધીનં ધનમ્ ॥૭૪॥
નીચસ્યાઽપિ ચિરં ચટૂનિ રચયન્ત્યાયાન્તિ નીચૈર્નતિં,
શત્રોરપ્યગુણાત્મનોઽપિ વિદધત્યુચ્ચૈર્ગુણોત્કીર્તનમ્।
નિર્વેદં ન વિદન્તિ કિંચિદકૃતજ્ઞસ્યાપિ સેવાક્રમે,
કષ્ટં કિં ન મનસ્વિનોઽપિ મનુજાઃ કુર્વન્તિ વિત્તાર્થિનઃ॥૭૫॥
લક્ષ્મીઃ સર્પતિ નીચમર્ણવપયઃસંગાદિવામ્ભોજિની,

संसर्गादिव कण्टकाकुलपदा न क्वाऽपि धत्ते पदम्।
चैतन्यं विषसन्निधेरिव नृणामुज्जासयत्यञ्जसा,
धर्मस्थाननियोजनेन गुणिभिर्ग्राह्यं तदस्याः फलम् ॥७६॥
चारित्रं चिनुते धिनोति विनयं ज्ञानं नयत्युन्नतिं,
पुष्णाति प्रशमं तपः प्रबलयत्युल्लासयत्यागमम्।
पुण्यं कन्दलयत्यघं दलयति स्वर्गं ददाति क्रमात्,
निर्वाणश्रियमातनोति निहितं पात्रे पवित्रं धनम् ॥७७॥
दारिद्र्यं न तमीक्षते न भजते दौर्भाग्यमालम्बते,
नाऽकीर्तिर्न पराभवोभिलषते न व्याधिरास्कन्दति।
दैन्यं नाद्रियते दुनोति न दरः क्लिश्नन्ति नैवापदः,
पात्रे यो वितरत्यनर्थदलनं दानं निदानं श्रियाम् ॥७८॥
लक्ष्मीः कामयते मतिर्मृगयते कीर्तिस्तमालोकते,
प्रीतिश्चुम्बति सेवते सुभगता नीरोगताऽऽलिङ्गति।
श्रेयःसंहतिरभ्युपैति वृणुते स्वर्गोपभोगस्थिति,-
र्मुक्तिर्वाञ्छति यः प्रयच्छति पुमान् पुण्यार्थमर्थं निजम् ॥७९॥
तस्यासन्ना रतिनुचरी कीर्तिरुत्कण्ठिता श्रीः,
स्निग्धा बुद्धिः परिचयपरा चक्रवर्तित्वऋद्धिः।
पाणौ प्राप्ता त्रिदिवकमला कामुकी मुक्तिसंपत्,
सप्तक्षेत्र्यां वपति विपुलं वित्तबीजं निजं यः ॥८०॥
यत्पूर्वार्जितकर्मशैलकुलिशं यत्कामदावानल-
ज्वालाजालजलं यदुग्रकरणग्रामाहिमन्त्राक्षरम्।
यत्प्रत्यूहतमःसमूहदिवसं यल्लब्धिलक्ष्मीलता,-
मूलं तद् द्विविधं यथाविधि तपः कुर्वीत वीतस्पृहः ॥८१॥
यस्माद्विघ्नपरंपरा विघटते दास्यं सुराः कुर्वते,
कामः शाम्यति दाम्यतीन्द्रियगणः कल्याणमुत्सर्पति।
उम्मीलन्ति महर्द्धयः कलयति ध्वंसं चयः कर्मणां,
स्वाधीनं त्रिदिवं शिवं च भवति श्लाध्यं तपस्तन्न किम् ॥८२॥
कान्तारं न यथेतरो ज्वलयितुं दक्षो दवाग्निं विना,
दावाग्निं न यथा परः शमयितुं शक्तो विनाम्भोधरम्।
निष्णातः पवनं विना निरसितुं नान्यो यथाम्भोधरं,
कर्मौघं तपसा विना किमपरो हर्तुं समर्थस्तथा ॥८३॥
संतोषस्थूलमूलः प्रशमपरिकरः, स्कन्धबन्धप्रपञ्चः,
पञ्चाक्षीरोधशाखः स्फुरदभयदलः शीलसंपत्प्रवालः।
श्रद्धाम्भःपूरसेकाद्विपुलकुलबलैश्वर्यसौन्दर्यभोगः,
स्वर्गादिप्राप्तिपुष्पः शिवपदफलदः स्यात्तपःपादपोऽयम् ॥८४॥
नीरागे तरुणीकटाक्षितमिव त्यागव्यपेतप्रभौ,
सेवाकष्टमिवोपरोपणमिवाम्भोजन्मनामश्मनि।
विष्वग्वर्षमिवोषरक्षितितले दानार्हदर्चातपः-
स्वाध्यायाध्ययनादि निष्फलमनुष्ठानं विना भावनाम् ॥८५॥
सर्वं ज्ञीप्सति पुण्यमीप्सति दयां धित्सत्यघं भित्सति,
क्रोधं दित्सति दानशीलतपसां साफल्यमादित्सति।
कल्याणोपचयं चिकीर्षति भवाम्भोधेस्तटं लिप्सते,
मुक्तिस्त्रीं परिरिप्सते यदि जनस्तद् भावयेद् भावनाम् ॥८६॥
विवेकवनसारिणीं प्रशमशर्मसंजीवनीं,
भवार्णवमहातरीं मदनदावमेघावलीम्।
चलाक्षमृगवागुरां गुरुकषायशैलाशनिं,

વિમુક્તિપથવેસરીં ભજત ભાવનાં કિં પરૈઃ ॥૮૭॥
ઘનં દત્તં વિત્તં જિનવચનમભ્યસ્તમખિલં,
ક્રિયાકાણ્ડં ચણ્ડં રચિતમવનૌ સુપ્તમસકૃત્।
તપસ્તીવ્રં તપ્તં ચરણમપિ ચીર્ણં ચિરતરં,
ન ચેચ્ચિત્તે ભાવસ્તુષવપનવત્સર્વમફલમ્ ॥૮૮॥
યદશુભરજઃપાથો દૃપ્તેન્દ્રિયદ્વિરદાઙ્કુશં,
કુશલકુસુમોદ્યાનં માદ્યન્મનઃકપિશૃઙ્ખલા।
વિરતિરમણીલીલાવેશ્મ સ્મરજ્વરભેષજં,
શિવપથરથસ્તદ્વૈરાગ્યં વિમૃશ્ય ભવાઽભયઃ ॥૮૯॥
ચણ્ડાનિલસ્ફુરિતમબ્દચયં દવાર્ચિ,-
ર્વૃક્ષવ્રજં તિમિરમણ્ડલમર્કબિમ્બમ્।
વજ્રં મહીધ્રનિવહં નયતે યથાન્તં,
વૈરાગ્યમેકમપિ કર્મ તથા સમગ્રમ્ ॥૯૦॥
નમસ્યા દેવાનાં ચરણવરિવસ્યા શુભગુરો,-
સ્તપસ્યા નિઃસીમશ્રમપદમુપાસ્યા ગુણવતામ્।
નિષદ્યાઽરણ્યે સ્યાત્ કરણદમવિદ્યા ચ શિવદા,
વિરાગઃ ક્રૂરાગઃક્ષપણનિપુણોઽન્તઃ સ્ફુરતિ ચેત્ ॥૯૧॥
ભોગાન્ કૃષ્ણભુજઙ્ગભોગવિષમાન્ રાજ્યં રજઃસન્નિભં,
બન્ધૂન્બન્ધનિબન્ધનાનિ વિષયગ્રામં વિષાન્નોપમમ્।
ભૂતિં ભૂતિસહોદરાં તૃણમિવ સ્ત્રૈણં વિદિત્વા ત્યજન્,
તેષ્વાસક્તિમનાવિલો વિલભતે મુક્તિં વિરક્તઃ પુમાન્ ॥૯૨॥
જિનેન્દ્રપૂજા ગુરુપર્યુપાસ્તિઃ,
સત્ત્વાનુકમ્પા શુભપાત્રદાનમ્।
ગુણાનુરાગઃ શ્રુતિરાગમસ્ય,
નૃજન્મવૃક્ષસ્ય ફલાન્યમૂનિ ॥૯૩॥
ત્રિસન્ધ્યં દેવાર્ચાં વિરચય ચયં પ્રાપય યશઃ,
શ્રિયઃ પાત્રે વાપં જનય નયમાર્ગં નય મનઃ।
સ્મરક્રોધાદ્યારીન્ દલય કલય પ્રાણિષુ દયાં,
જિનોક્તં સિદ્ધાન્તં શ્રૃણુ વૃણુ જવાન્મુક્તિકમલામ્ ॥૯૪॥
કૃત્વાઽર્હત્પદપૂજનં યતિજનં નત્વા વિદિત્વાઽઽગમં,
હિત્વા સઙ્ગમધર્મકર્મઠધિયાં પાત્રેષુ દત્ત્વા ધનમ્।
ગત્વા પદ્ધતિમુત્તમક્રમજુષાં જિત્વાઽન્તરારિવ્રજં,
સ્મૃત્વા પઞ્ચનમસ્ક્રિયાં કુરુ કરક્રોડસ્થમિષ્ટં સુખમ્ ॥૯૫॥
પ્રસરતિ યથા કીર્તિર્દિક્ષુ ક્ષપાકરસોદરા-,
ઽભ્યુદયજનની યાતિ સ્ફાતિં યથા ગુણસંતતિઃ।
કલયતિ યથા વૃદ્ધિં ધર્મઃ કુકર્મહતિક્ષમઃ,
કુશલસુલભે ન્યાય્યે કાર્યં તથા પથિ વર્તનમ્ ॥૯૬॥
કરે શ્લાઘ્યસ્ત્યાગઃ શિરસિ ગુરુપાદ-પ્રણમનં,
મુખે સત્યા વાણી શ્રુતમધિગતં ચ શ્રવણયોઃ।
હૃદિ સ્વચ્છા વૃત્તિર્વિજયિ ભુજ્યોઃ પૌરુષમહો,
વિનાપ્યૈશ્વર્યેણ પ્રકૃતિમહતાં મણ્ડનમિદમ્ ॥૯૭॥
ભવારણ્યં મુક્ત્વા, યદિ જિગમિષુર્મુક્તિનગરીં,
તદાનીં મા કાર્ષીર્વિષયવિષવૃક્ષેષુ વસતિમ્।
યતશ્છાયાપ્યેષાં પ્રથયતિ મહામોહમચિરા,-
દયં જન્તુર્યસ્માત્પદમપિ ન ગન્તું પ્રભવતિ ॥૯૮॥
સોમપ્રભાચાર્યમભા ચ યન્ન,

પુંસાં તમઃપઙ્કમપાકરોતિ।
તદપ્યમુષ્મિન્નુપદેશલેશે,
નિશમ્યમાનેઽનિશમેતિ નાશમ્ ॥૯૯॥
અભજદજિતદેવા-ચાર્યપટ્ટોદયાદ્રિ,-
દ્યુમણિવિજયસિંહાચાર્યપાદારવિન્દે।
મધુકરસમતાં યસ્તેન સોમપ્રભેણ,
વ્યરચિ મુનિપ-રાજ્ઞા સૂક્તમુક્તાવલીયમ્ ॥૧૦૦॥

**ન્યાયવિશા. મહોપા. શ્રીયશોવિજયવિરચિત**

# અધ્યાત્મ ઉપનિષદ્

ઐન્દ્રવૃન્દનતં નત્વા વીતરાગં સ્વયમ્ભુવમ્।
અધ્યાત્મોપનિષન્નામા ગ્રન્થોઽસ્માભિર્વિધીયતે ॥૧॥
આત્માનમધિકૃત્ય સ્યાદ્યઃ પઞ્ચાચારચારિમા।
શબ્દયોગાર્થનિપુણાસ્તદધ્યાત્મં પ્રચક્ષતે ॥૨॥
રૂઢ્યર્થનિપુણાસ્ત્વાહુશ્ચિત્તં મૈત્ર્યાદિવાસિતમ્।
અધ્યાત્મં નિર્મલં બાહ્યવ્યવહારોપબૃંહિતમ્ ॥૩॥
એવમ્ભૂતનયે જ્ઞેયઃ પ્રથમોઽર્થોઽત્ર કોવિદૈઃ।
યથાયથં દ્વિતીયોઽર્થો વ્યવહારર્જુસૂત્રયોઃ ॥૪॥
ગલન્નયકૃતભ્રાન્તિર્યઃ સ્યાદ્વિશ્રાન્તિસમ્મુખઃ।
સ્યાદ્વાદવિશદાલોકઃ સ એવાધ્યાત્મભાજનમ્ ॥૫॥
મનોવત્સો યુક્તિગવીં મધ્યસ્થસ્યાનુધાવતિ।
તામાકર્ષતિ પુચ્છેન તુચ્છાગ્રહમનઃકપિઃ ॥૬॥
અનર્થાયૈવ નાર્થાય જાતિપ્રાયાશ્ચ યુક્તયઃ।
હસ્તી હન્તીતિ વચને પ્રાપ્તાપ્રાપ્તવિકલ્પવત્ ॥૭॥
જ્ઞાયેરન્ હેતુવાદેન પદાર્થા યદ્યતીન્દ્રિયાઃ।
કાલેનૈતાવતા પ્રાજ્ઞૈઃ કૃતઃ સ્યાત્તેષુ નિશ્ચયઃ ॥૮॥
આગમશ્ચોપપત્તિશ્ચ સમ્પૂર્ણં દૃષ્ટિલક્ષણમ્।
અતીન્દ્રિયાણામર્થાનાં સદ્ભાવપ્રતિપત્તયે ॥૯॥
અન્તરા કેવલજ્ઞાનં છદ્મસ્થાઃ ખલ્વચક્ષુષઃ।
હસ્તસ્પર્શસમં શાસ્ત્રજ્ઞાનં તદ્વ્યવહારકૃત્ ॥૧૦॥
શુદ્ધોઞ્છાદ્યપિ શાસ્ત્રાજ્ઞાનિરપેક્ષસ્ય નો હિતમ્।
ભૌતહન્તુર્યથા તસ્ય પદસ્પર્શનિષેધનમ્ ॥૧૧॥
શાસનાત્ ત્રાણશક્તેશ્ચ બુધૈઃ શાસ્ત્રં નિરૂચ્યતે।
વચનં વીતરાગસ્ય તચ્ચ નાન્યસ્ય કસ્યચિત્ ॥૧૨॥
વીતરાગોઽનૃતં નૈવ બ્રૂયાત્તદ્ધેત્વભાવતઃ।
યસ્તદ્વાક્યેષ્વનાશ્વાસસ્તન્મહામોહજૃમ્ભિતમ્ ॥૧૩॥
શાસ્ત્રે પુરસ્કૃતે તસ્માદ્વીતરાગઃ પુરસ્કૃતઃ।
પુરસ્કૃતે પુનસ્તસ્મિન્નિયમાત્ સર્વસિદ્ધયઃ ॥૧૪॥
એનં કેચિત્ સમાપત્તિં વદન્ત્યન્યે ધ્રુવં પદમ્।
પ્રશાન્તવાહિતામન્યે વિસભાગક્ષયં પરે ॥૧૫॥
ચર્મચક્ષુર્ભૃતઃ સર્વે દેવાશ્ચાવધિચક્ષુષઃ।
સર્વતશ્ચક્ષુષઃ સિદ્ધા યોગિનઃ શાસ્ત્રચક્ષુષઃ ॥૧૬॥
પરીક્ષન્ત કષચ્છેદતાપૈઃ સ્વર્ણં યથા જનાઃ।
શાસ્ત્રેઽપિ વર્ણિકાશુદ્ધિં પરીક્ષન્તાં તથા બુધાઃ ॥૧૭॥
વિધયઃ પ્રતિષેધાશ્ચ ભૂયાંસો યત્ર વર્ણિતાઃ।
એકાધિકારા દૃશ્યન્તે કષશુદ્ધિં વદન્તિ તામ્ ॥૧૮॥

સિદ્ધાન્તેષુ યથા ધ્યાનાધ્યયનાદિવિધિવ્રજાઃ।
હિંસાદીનાં નિષેધાશ્ચ ભૂયાંસો મોક્ષગોચરાઃ ॥૧૯॥
અર્થકામવિમિશ્રં યદ્યચ્ચ ક્લૃપ્તકથાવિલમ્।
આનુષઙ્ગિકમોક્ષાર્થં યન્ન તત્ કષશુદ્ધિમત્ ॥૨૦॥
વિધીનાં ચ નિષેધાનાં યોગક્ષેમકરી ક્રિયા।
વર્ણ્યતે યત્ર સર્વત્ર તચ્છાસ્ત્રં છેદશુદ્ધિમત્ ॥૨૧॥
કાયિકાદ્યપિ કુર્વીત ગુપ્તશ્ચ સમિતો મુનિઃ।
કૃત્યે જ્યાયસિ કિં વાચ્યમિત્યુક્તં સમયે યથા ॥૨૨॥
અન્યાર્થં કિઞ્ચિદુત્સુષ્ટં યત્રાન્યાર્થમપોહ્યતે।
દુર્વિધિપ્રતિષેધં તન્ન શાસ્ત્રં છેદશુદ્ધિમત્ ॥૨૩॥
નિષિદ્ધસ્ય વિધાનેડપિ હિંસાદેર્ભૂતિકામિભિઃ।
દાહસ્યેવ ન સદ્વૈદ્યૈર્યાતિ પ્રકૃતિદુષ્ટતા ॥૨૪॥
હિંસા ભાવકૃતો દોષો દાહસ્તુ ન તથેતિ ચેત્।
ભૂત્યર્થં તદ્વિધોનેડપિ ભાવદોષઃ કથં ગતઃ ॥૨૫॥
વેદોક્તત્વાન્મનઃશુદ્ધ્યા કર્મયજ્ઞોડપિ યોગિનઃ।
બ્રહ્મયજ્ઞ ઇતીચ્છન્તઃ શ્યેનયાગં ત્યજન્તિ કિમ્ ॥૨૬॥
વેદાન્તવિધિશેષત્વમતઃ કર્મવિધેર્હિતમ્।
ભિન્નાત્મદર્શકાઃ શેષા વેદાન્તા એવ કર્મણઃ ॥૨૭॥
કર્મણાં નિરવદ્યાનાં ચિત્તશોધકતાં પરમ્।
સાઙ્ખ્યાચાર્યા અપીચ્છન્તીત્યાસ્તામેષોડત્ર વિસ્તરઃ ॥૨૮॥
યત્ર સર્વનયાલમ્બિવિચારપ્રબલાગ્નિના।
તાત્પર્યશ્યામિકા ન સ્યાત્તચ્છાસ્ત્રં તાપશુદ્ધિમત્ ॥૨૯॥
યથાહ સોમિલપ્રશ્ને જિનઃ સ્યાદ્વાદસિદ્ધયે।
દ્રવ્યાર્થાદહમેકોડસ્મિ દગ્જ્ઞાનાર્થાદુભાવપિ ॥૩૦॥
અક્ષયશ્ચાવ્યયશ્ચાસ્મિ પ્રદેશાર્થવિચારતઃ।
અનેકભૂતભાવાત્મા પર્યાયાર્થપરિગ્રહાત્ ॥૩૧॥
દ્વયોરેકત્વબુદ્ધ્યાપિ યથા દ્વિત્વં ન ગચ્છતિ।
નયૈકાન્તધિયાપ્યેવમનેકાન્તો ન ગચ્છતિ ॥૩૨॥
સામગ્ર્યેણ ન માનં સ્યાદ્ દ્વયોરેકત્વધીર્યથા।
તથા વસ્તુનિ વસ્ત્વંશબુદ્ધિર્જ્ઞેયા નયાત્મિકા ॥૩૩॥
એકદેશેન ચૈકત્વધીર્દ્વયોઃ સ્યાદ્યથા પ્રમા।
તથા વસ્તુનિ વસ્ત્વંશબુદ્ધિર્જ્ઞેયા નયાત્મિકા ॥૩૪॥
ઇત્થં ચ સંશયત્વં યન્નયાનાં ભાષતે પરઃ।
તદપાસ્તં વિલંબાનાં પ્રત્યેકં ન નયેષુ યત્ ॥૩૫॥
સામગ્ર્યેણ દ્વયાલંબેડપ્યવિરોધે સમુચ્ચયઃ।
વિરોધે દુર્નયવ્રાતાઃ સ્વશસ્ત્રેણ સ્વયં હતાઃ ॥૩૬॥
કથં વિપ્રતિષિદ્ધાનાં ન વિરોધઃ સમુચ્ચયે।
અપેક્ષાભેદતો હન્ત કૈવ વિપ્રતિષિદ્તા ॥૩૭॥
ભિન્નાપેક્ષા યથૈકત્ર પિતૃપુત્રાદિકલ્પના।
નિત્યાનિત્યાદ્યનેકાન્તસ્તથૈવ ન વિરોત્સ્યતે ॥૩૮॥
વ્યાપકે સત્યનેકાન્તે સ્વરૂપપરરૂપયોઃ।
આનેકાન્ત્યાન્ન કુત્રાપિ નિર્ણીતિરિતિ ચેન્મતિઃ ॥૩૯॥
અવ્યાપ્યવૃત્તિધર્માણાં યથાવચ્છેદકાશ્રય।
નાપિ તતઃ પરાવૃત્તિસ્તત્ કિં નાત્ર તથેક્ષ્યતે ॥૪૦॥
આનૈગમાન્ત્યભેદં તત્પરાવૃત્તાવપિ સ્ફૂટમ્।
અભિપ્રેતાશ્રયેણૈવ નિર્ણયો વ્યવહારકઃ ॥૪૧॥

અનેકાન્તેઽપ્યનેકાન્તાદનિષ્ઠૈવમપાકૃતા।
નયસૂક્ષ્મેક્ષિકાપ્રાન્તે વિશ્રાન્તેઃ સુલભત્વતઃ ॥૪૨॥
આત્માશ્રયાદયોઽપ્યત્ર સાવકાશા ન કર્હિચિત્।
તે હિ પ્રમાણસિદ્ધાર્થાત્ પ્રકૃત્યૈવ પરાઙ્મુખાઃ ॥૪૩॥
ઉત્પન્નં દધિભાવેન નષ્ટં દુગ્ધતયા પયઃ।
ગોરસત્વાત્ સ્થિરં જાનન્ સ્યાદ્વાદદ્વિડ્ જનોઽપિ કઃ ॥૪૪॥
ઇચ્છન્ પ્રધાનં સત્ત્વાદ્યૈર્વિરુદ્ધૈર્ગુમ્ફિતં ગુણૈઃ।
સાઙ્ખ્યઃ સઙ્ખ્યાવતાં મુખ્યો નાનેકાન્તં પ્રતિક્ષિપેત્ ॥૪૫॥
વિજ્ઞાનસ્યૈકમાકારં નાનાકારકરમ્બિતમ્।
ઇચ્છંસ્તથાગતઃ પ્રાજ્ઞો નાનેકાન્તં પ્રતિક્ષિપેત્ ॥૪૬॥
ચિત્રમેકમનેકં ચ રૂપં પ્રામાણિકં વદન્।
યોગો વૈશેષિકો વાપિ નાનેકાન્તં પ્રતિક્ષિપેત્ ॥૪૭॥
પ્રત્યક્ષં મિતિમાત્રંશે મેયાંશે તદ્વિલક્ષણમ્।
ગુરુર્જ્ઞાનં વદન્નેકં નાનેકાન્તં પ્રતિક્ષિપેત્ ॥૪૮॥
જાતિવ્યક્ત્યાત્મકં વસ્તુ વદન્નનુભવોચિતમ્।
ભટ્ટો વાપિ મુરારિર્વા નાનેકાન્તં પ્રતિક્ષિપેત્ ॥૪૯॥
અબદ્ધં પરમાર્થેન બદ્ધં ચ વ્યવહારતઃ।
બ્રુવાણો બ્રહ્મવેદાન્તી નાનેકાન્તં પ્રતિક્ષિપેત્ ॥૫૦॥
બ્રુવાણા ભિન્નભિન્નાર્થાન્નયભેદવ્યપેક્ષયા।
પ્રતિક્ષિપેયુર્નો વેદાઃ સ્યાદ્વાદં સાર્વતાન્ત્રિકમ્ ॥૫૧॥
વિમતિઃ સમ્મતિર્વાપિ ચાર્વાકસ્ય ન મૃગ્યતે।
પરલોકાત્મમોક્ષેષુ યસ્ય મુહ્યતિ શેમુષી ॥૫૨॥
તેનાનેકાન્તસૂત્રં યદ્યદ્વા સૂત્રં નયાત્મકમ્।
તદેવ તાપશુદ્ધં સ્યાન્ન તુ દુર્નયસંજ્ઞિતમ્ ॥૫૩॥
નિત્યૈકાન્તે ન હિંસાદિ તત્પર્યાયાપરિક્ષયાત્।
મનઃસંયોગનાશાદૌ વ્યાપારાનુપલમ્ભતઃ ॥૫૪॥
બુદ્ધિલેપોઽપિ કો નિત્યનિર્લેપાત્મવ્યવસ્થિતૌ।
સામાનાધિકરણ્યેન બન્ધમોક્ષૌ હિ સઙ્ગતૌ ॥૫૫॥
અનિત્યૈકાન્તપક્ષેઽપિ હિંસાદિકમસઙ્ગતમ્।
સ્વતો વિનાશશીલાનાં ક્ષણાનાં નાશકોઽસ્તુ કઃ ॥૫૬॥
આનન્તર્યં ક્ષણાનાં તુ ન હિંસાદિનિયામકમ્।
વિશેષાદર્શનાત્તસ્ય બુદ્ધલુબ્ધકયોર્મિથઃ ॥૫૭॥
સઙ્ક્લેશેન વિશેષશ્ચેદાનન્તર્યમપાર્થકમ્।
ન હિ તેનાપિ સઙ્ક્લિષ્ટમધ્યે ભેદો વિધીયતે ॥૫૮॥
મનોવાક્કાયયોગાનાં ભેદાદેવં ક્રિયાભિદા।
સમગ્રૈવ વિશીર્યેતેત્યેતદન્યત્ર ચર્ચિતમ્ ॥૫૯॥
નિત્યાનિત્યાદ્યનેકાન્તશાસ્ત્રં તસ્માદ્વિશિષ્યતે।
તદ્દૃષ્ટ્યૈવ હિ માધ્યસ્થ્યં ગરિષ્ઠમુપપદ્યતે ॥૬૦॥
યસ્ય સર્વત્ર સમતા નયેષુ તનયેષ્વિવ।
તસ્યાનેકાન્તવાદસ્ય ક્વ ન્યૂનાધિકશેમુષી ॥૬૧॥
સ્વતન્ત્રાસ્તુ નયાસ્તસ્ય નાંશાઃ કિં તુ પ્રકલ્પિતાઃ।
રાગદ્વેષૌ કથં તસ્ય દૂષણેઽપિ ચ ભૂષણે ॥૬૨॥
અર્થે મહેન્દ્રજાલસ્ય દૂષિતેઽપિ ચ ભૂષિતે।
યથા જનાનાં માધ્યસ્થ્યં દુર્નયાર્થે તથા મુનેઃ ॥૬૩॥
દૂષયેદજ્ઞ એવોચ્ચૈઃ સ્યાદ્વાદં ન તુ પણ્ડિતઃ।
અજ્ઞપ્રલાપે સુજ્ઞાનાં ન દ્વેષઃ કરુણૈવ તુ ॥૬૪॥

ત્રિવિધં જ્ઞાનમાખ્યાતં શ્રુતં ચિન્તા ચ ભાવના।
આદ્યં કોષ્ઠમબીજાભં વાક્યાર્થવિષયં મતમ્ ॥૬૫॥
મહાવાક્યાર્થજં યત્તુ સૂક્ષ્મયુક્તિશતાન્વિતમ્।
તદ્દ્વિતીયં જલે તૈલબિન્દુરીત્યા પ્રસૃત્વરમ્ ॥૬૬॥
ઐદમ્પર્યગતં યચ્ચ વિધ્યાદૌ યત્નવચ્ચ યત્।
તૃતીયં તદ્વિશુદ્ધોચ્ચજાત્યરત્નવિભાનિભમ્ ॥૬૭॥
આદ્યે જ્ઞાને મનાક્ પુંસસ્તદ્રાગાદર્શનગ્રહઃ।
દ્વિતીયે ન ભવત્યેષ ચિન્તાયોગાત્કદાચન ॥૬૮॥
ચારિસઞ્જીવિનીચારકારકજ્ઞાતતોઽન્તિમે।
સર્વત્રૈવ હિતા વૃત્તિર્ગામ્ભીર્યાત્તત્ત્વદર્શિનઃ ॥૬૯॥
તેન સ્યાદ્વાદમાલમ્બ્ય સર્વદર્શનતુલ્યતામ્।
મોક્ષોદ્દેશાવિ(દ્વિ?)શેષેણ યઃ પશ્યતિ સ શાસ્ત્રવિત્ ॥૭૦॥
માધ્યસ્થ્યમેવ શાસ્ત્રાર્થો યેન તચ્ચારુ સિધ્યતિ।
સ એવ ધર્મવાદઃ સ્યાદન્યદ્બાલિશવલ્ગનમ્ ॥૭૧॥
પુત્રદારાદિસંસારો ધનિનાં મૂઢચેતસામ્।
પણ્ડિતાનાં તુ સંસારઃ શાસ્ત્રમધ્યાત્મવર્જિતમ્ ॥૭૨॥
માધ્યસ્થ્યસહિતં હ્યેકપદજ્ઞાનમપિ પ્રમા।
શાસ્ત્રકોટિર્વૃથૈવાન્યા તથા ચોક્તં મહાત્મના ॥૭૩॥
વાદાંશ્ચ પ્રતિવાદાંશ્ચ વદન્તોઽનિશ્ચિતાંસ્તથા।
તત્ત્વાન્તં નૈવ ગચ્છન્તિ તિલપીલકવદ્ગતૌ ॥૭૪॥
ઇતિ યદિવદનાત્પદાનિ બુદ્ધ્વા
પ્રશમવિવેચનસંવરાભિધાનિ।
પ્રદલિતદુરિતઃ ક્ષણાચ્ચિલાતિતનય
ઇહ ત્રિદશાલયં જગામ ॥૭૫॥
નચાનેકાન્તાર્થાવગમરહિતસ્યાસ્ય ફલિતમ્,
કથં માધ્યસ્થ્યેન સ્ફુટમિતિ વિધેયં ભ્રમપદમ્।
સમાધેરવ્યક્તાદ્યદમિદધતિ વ્યક્તસદૃશમ્।
ફલં યોગાચાર્યા ધ્રુવમભિનિવેશો વિગલિતે ॥૭૬॥
વિશેષાદોધાદ્વા સંપદિ તદનેકાન્તસમયે, સમુન્મીલદ્ભક્તિર્ભવતિ ય ઇહાધ્યાત્મવિશદઃ।
ભૃશં ધીરોદાત્તપ્રિયતમગુણોજ્જાગરરુચિર્યશઃ
શ્રીસ્તસ્યાઙ્ક ત્યજતિ ન કદાપિ પ્રણયિની ॥૭૭॥

**પ્રથમોઽધિકારઃ સમાપ્તઃ**

દિશા દર્શિતયા શાસ્ત્રૈર્ગચ્છન્નચ્છમતિઃ પથિ।
જ્ઞાનયોગં પ્રયુઞ્જીત તદ્વિશેષોપલબ્ધયે ॥૧॥
યોગજાદૃષ્ટજનિતઃ સ તુ પ્રાતિભસંજ્ઞિતઃ।
સન્ધ્યેવ દિનરાત્રિભ્યાં કેવલશ્રુતયોઃ પૃથક્ ॥૨॥
પદમાત્રં હિ નાન્વેતિ શાસ્ત્રં દિગ્દર્શનોત્તરમ્।
જ્ઞાનયોગો મુનેઃ પાર્શ્વમાકૈવલ્યં ન મુઞ્ચતિ ॥૩॥
તત્ત્વતો બ્રહ્મણઃ શાસ્ત્રં લક્ષકં ન તુ દર્શકમ્।
ન ચાદૃષ્ટાત્મતત્ત્વસ્ય દૃષ્ટભ્રાન્તિર્નિવર્તતે ॥૪॥
તેનાત્મદર્શનાકાઙ્ક્ષી જ્ઞાનેનાન્તર્મુખો ભવેત્।
દ્રષ્ટ્દૃગાત્મતા મુક્તિર્દૃશ્યૈકાત્મ્યં ભવભ્રમઃ ॥૫॥
આત્મજ્ઞાને મુનિર્મગ્નઃ સર્વં પુદ્ગલવિભ્રમમ્।
મહેન્દ્રજાલવદ્વેત્તિ નૈવ તત્રાનુરજ્યતે ॥૬॥

આસ્વાદિતા સુમધુરા યેન જ્ઞાનરતિઃ સુધા।
ન લગત્યેવ તચ્ચેતો વિષયેષુ વિષેષ્વિવ ॥૭॥
સત્તત્ત્વચિન્તયા યસ્યાભિસમન્વાગતા ઇમે।
આત્મવાન્ જ્ઞાનવાન્ વેદધર્મવાન્ બ્રહ્મવાંશ્ચ સઃ ॥૮॥
વિષયાન્ સાધકઃ પૂર્વમનિષ્ટત્વધિયા ત્યજેત્।
ન ત્યજેન્ન ચ ગૃહ્ણીયાત્ સિદ્ધો વિન્દ્યાત્ સ તત્ત્વતઃ ॥૯॥
યોગારમ્ભદશાસ્થસ્ય દુઃખમન્તર્બહિઃ સુખમ્।
સુખમન્તર્બહિર્દુઃખં સિદ્ધયોગસ્ય તુ ધ્રુવમ્ ॥૧૦॥
પ્રકાશશક્ત્યા યદ્રૂપમાત્મનો જ્ઞાનમુચ્યતે।
સુખં સ્વરૂપવિશ્રાન્તિશક્ત્યા વાચ્યં તદેવ તુ ॥૧૧॥
સર્વં પરવશં દુઃખં સર્વમાત્મવશં સુખમ્।
એતદુક્તં સમાસેન લક્ષણં સુખદુઃખયો ॥૧૨॥
જ્ઞાનમગ્નસ્ય યચ્છર્મ તદ્વક્તું નૈવ પાર્યતે।
નોપમેયં પ્રિયાશ્લેષૈર્નાપિ તચ્ચન્દનદ્રવૈઃ ॥૧૩॥
તેજોલેશ્યાવિવૃદ્ધિર્યા પર્યાયક્રમવૃદ્ધિતઃ।
ભાષિતા ભગવત્યાદૌ સેત્થમ્ભૂતસ્ય યુજ્યતે ॥૧૪॥
ચિન્માત્રલક્ષણેનાન્યવ્યતિરિક્તત્વ માત્મનઃ।
પ્રતીયતે યદશ્રાન્તં તદેવ જ્ઞાનમુત્તમમ્ ॥૧૫॥
શુભોપયોગરૂપોઽયં સમાધિઃ સવિકલ્પકઃ।
શુદ્ધોપયોગરૂપસ્તુ નિર્વિકલ્પસ્તદેકદક્ ॥૧૬॥
આદ્યઃ સાલમ્બનો નામ યોગોઽનાલમ્બનઃ પરઃ।
છાયાયા દર્પણાભાવે મુખવિશ્રાન્તિસંનિભઃ ॥૧૭॥
યદ્દૃશ્યં યચ્ચ નિર્વાચ્યં મનનીયં યદ્ભુવિ।
તદ્રૂપં પરસંશ્લિષ્ટં ન શુદ્ધદ્રવ્યલક્ષણમ્ ॥૧૮॥
અપદસ્ય પદં નાસ્તીત્યુપક્રમ્યાગમે તતઃ।
ઉપાધિમાત્રવ્યાવૃત્ત્યા પ્રોક્તં શુદ્ધાત્મલક્ષણમ્ ॥૧૯॥
યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ।
ઇતિ શ્રુતિરપિ વ્યક્તમેતદર્થાનુભાષિણી ॥૨૦॥
અતીન્દ્રિયં પરં બ્રહ્મ વિશુદ્ધાનુભવં વિના।
શાસ્ત્રયુક્તિશતેનાપિ નૈવ ગમ્યં કદાચન ॥૨૧॥
કેષાં ન કલ્પના દર્વી શાસ્ત્રક્ષીરાન્નગાહિની।
વિરલાસ્તદ્રસાસ્વાદવિદોઽનુભવજિહ્વયા ॥૨૨॥
પશ્યતુ બ્રહ્મનિર્દ્વંદ્વં નિર્દ્વંદ્વાનુભવં વિના।
કથં લિપિમયી દૃષ્ટિઃ વાઙ્મયી વા મનોમયી ॥૨૩॥
ન સુષુપ્તિરમોહત્વાન્નાપિ ચ સ્વાપજાગરૌ।
કલ્પનાશિલ્પવિશ્રાન્તેસ્તુર્યૈવાનુભવો દશા ॥૨૪॥
અધિગત્યાખિલં શબ્દબ્રહ્મ શાસ્ત્રદશા મુનિઃ।
સ્વસંવેદ્યપરં બ્રહ્માનુભવૈરધિગચ્છતિ ॥૨૫॥
યે પર્યાયેષુ નિરતાસ્તે હ્યન્યસમયસ્થિરતાઃ।
આત્મસ્વભાવનિષ્ઠાનાં ધ્રુવા સ્વસમયસ્થિતિઃ ॥૨૬॥
આવાપોદ્વાપવિશ્રાન્તિર્યત્રાશુદ્ધનયસ્ય તત્।
શુદ્ધાનુભવસંવેદ્યં સ્વરૂપં પરમાત્મનઃ ॥૨૭॥
ગુણસ્થાનાનિ યાવન્તિ યાવન્ત્યશ્ચાપિ માર્ગણાઃ।
તદન્યતરસંશ્લેષો નૈવાતઃ પરમાત્મનઃ ॥૩૮॥
કર્મોપાધિકૃતાન્ ભાવાન્ ય આત્મન્યધ્યવસ્યતિ।

તેન સ્વાભાવિકં રૂપં ન બુદ્ધં પરમાત્મનઃ ॥૨૯॥
યથા ભૃત્યૈઃ કૃતં યુદ્ધં સ્વામિન્યેવોપચર્યતે।
શુદ્ધાત્મન્યવિવેકેન કર્મસ્કન્ધોર્જિતં તથા ॥૩૦॥
મુષિતત્વં યથા પાન્થગતં પથ્યુપચર્યતે।
તથા વ્યવહરત્યજ્ઞશ્ચિદ્રૂપે કર્મવિક્રિયામ્ ॥૩૧॥
સ્વત એવ સમાયાન્તિ કર્માણ્યારબ્ધશક્તિતઃ।
એકક્ષેત્રાવગાહેન જ્ઞાની તત્ર ન દોષભાક્ ॥૩૨॥
દારુયન્ત્રસ્થપાઞ્ચાલીનૃત્યતુલ્યાઃ પ્રવૃત્તયઃ।
યોગિનો નૈવ બાધાયૈ જ્ઞાનિનો લોકવર્તિનઃ ॥૩૩॥
પ્રારબ્ધાદૃષ્ટજનિતાત્ સામાયિકવિવેકતઃ।
ક્રિયાપિ જ્ઞાનિનો વ્યક્તામૌચિતીં નાતિવર્તતે ॥૩૪॥
સંસારે નિવસન્ સ્વાર્થસજ્જઃ કજ્જલવેશ્મનિ।
લિપ્યતે નિખિલો લોકો જ્ઞાનસિદ્ધો ન લિપ્યતે ॥૩૫॥
નાહં પુદ્‌ગલભાવાનાં કર્તા કારયિતા ચ ન।
નાનુમન્તાપિ ચેત્યાત્મજ્ઞાનવાન્ લિપ્યતે કથમ્ ॥૩૬॥
લિપ્યતે પુદ્‌ગલસ્કન્ધો ન લિપ્યે પુદ્‌ગલૈરહમ્।
ચિત્રવ્યોમાઞ્જનેનેવ ધ્યાયન્નિતિ ન લિપ્યતે ॥૩૭॥
લિપ્તતા જ્ઞાનસમ્પાતપ્રતિઘાતાય કેવલમ્।
નિર્લેપજ્ઞાનમગ્નસ્ય ક્રિયા સર્વોપયુજ્યતે ॥૩૮॥
તપઃશ્રુતાદિના મત્તઃ ક્રિયાવાનપિ લિપ્યતે।
ભાવનાજ્ઞાનસમ્પન્નો નિષ્ક્રિયોઽપિ ન લિપ્યતે ॥૩૯॥
સમલં નિર્મલં ચેદમિતિ દ્વૈતં યદાગતમ્।
અદ્વૈતં નિર્મલં બ્રહ્મ તદૈકમવશિષ્યતે ॥૪૦॥
મહાસામાન્યરૂપેઽસ્મિન્મજ્જન્તિ નયજા ભિદાઃ।
સમુદ્ર ઇવ કલ્લોલાઃ પવનોન્માથનિર્મિતાઃ ॥૪૧॥
ષડ્‌દ્રવ્યૈકાત્મ્યસંસ્પર્શિ સત્સામાન્યં હિ યદ્યપિ।
પરસ્યાનુપયોગિત્વાત્ સ્વવિશ્રાન્તં તથાપિ તત્ ॥૪૨॥
નયેન સઙ્ગ્રહેણૈવમૃજુસૂત્રોપજીવિના।
સચ્ચિદાનન્દરૂપત્વં બ્રહ્મણો વ્યવતિષ્ઠતે ॥૪૩॥
સત્ત્વચિત્ત્વાદિધર્માણાં ભેદાભેદવિચારણે।
ન ચાર્થોઽયં વિશીર્યેત નિર્વિકલ્પપ્રસિદ્ધિતઃ ॥૪૪॥
યોગજાનુભવારૂઢે સન્માત્રે નિર્વિકલ્પકે।
વિકલ્પોઘાસહિષ્ણુત્વં ભૂષણં ન તુ દૂષણમ્ ॥૪૫॥
યો હ્યાખ્યાતુમશક્યોઽપિ પ્રત્યાખ્યાતુ ન શક્યતે।
પ્રાજ્ઞૈર્ન દૂષણીયોઽર્થઃ સ માધુર્યવિશેષવત્ ॥૪૬॥
કુમારી ન યથા વેત્તિ સુખં દયિતભોગજમ્।
ન જાનાતિ તથા લોકો યોગિનાં જ્ઞાનજં સુખમ્ ॥૪૭॥
અત્યન્તપક્વબોધાય સમાધિર્નિર્વિકલ્પકઃ।
વાચ્યોઽયં નાર્ધવિજ્ઞસ્ય તથા ચોક્તં પરૈરપિ ॥૪૮॥
આદૌ શમદમપ્રાયૈર્ગુણૈઃ શિષ્યં પ્રબોધયેત્।
પશ્ચાત્ સર્વમિદં બ્રહ્મ શુદ્ધસ્ત્વમિતિ બોધયેત્ ॥૪૯॥
અજ્ઞસ્યાર્ધપ્રબુદ્ધસ્ય સર્વં બ્રહ્મેતિ યો વદેત્।
મહાનરકજાલેષુ સ તેન વિનિયોજિતઃ ॥૫૦॥
તેનાદૌ શોધયેચ્ચિત્તં સદ્વિકલ્પૈર્વ્રતાદિભિઃ।
યત્કામાદિવિકારાણાં પ્રતિસંખ્યાનનાશ્યતા ॥૫૧॥
વિકલ્પરૂપા માયેયં વિકલ્પેનૈવ નાશ્યતે।

અવસ્થાન્તરભેદેન તથા ચોક્તં પરૈરપિ ॥૫૨॥
અવિદ્યયૈવોત્તમયા સ્વાત્મનાશોદ્યમોત્થયા।
વિદ્યા સમ્પ્રાપ્યતે રામ સર્વદોષાપહારિણી ॥૫૩॥
શામ્યતિ હ્યસ્ત્રમસ્ત્રેણ મલેન ક્ષાલ્યતે મલઃ।
શમં વિષં વિષેણૈતિ રિપુણા હન્યતે રિપુઃ ॥૬૪॥
ઈદૃશી ભૂતમાયેયં યા સ્વનાશેન હર્ષદા।
ન લક્ષ્યતે સ્વભાવોઽસ્યાઃ પ્રેક્ષ્યમાણૈવ નશ્યતિ ॥૫૫॥
વ્રતાદિઃ શુભસઙ્કલ્પો નિર્નાશ્યાશુભવાસનામ્।
દાહ્યં વિનૈવ દહનઃ સ્વયમેવ વિનઙ્ક્ષ્યતિ ॥૫૬॥
ઇયં નૈશ્ચેયિકી શક્તિર્ન પ્રવૃત્તિર્ન વા ક્રિયા।
શુભસઙ્કલ્પનાશાર્થં યોગિનામુપયુંજ્યતે ॥૫૭॥
દ્વિતીયાપૂર્વકરણે ક્ષાયોપશમિકા ગુણાઃ।
ક્ષમાદ્યા અપિ યાસ્યન્તિ સ્થાસ્યન્તિ ક્ષાયિકાઃ પરમ્ ॥૫૮॥
ઇત્થં યથાબલમનુદ્યમમુદ્યમં ચ કુર્વન્ દૃશાનુગુણમુત્તમમાન્તરાર્થે।
ચિન્માત્રનિર્ભરનિવેશિતપક્ષપાતઃ,
પ્રાતર્દ્યુરત્નમિવ દીપ્તિમુપૈતિ યોગી ॥૫૯॥
અભ્યસ્ય તુ પ્રવિતતં વ્યવહામાર્ગં,
પ્રજ્ઞાપનીય ઇહ સદ્ગુરુવાક્યનિષ્ઠઃ।
ચિદ્દર્પણપ્રતિફલત્ત્રિજગદ્વિવર્તે,
વર્તેત કિં પુનરસૌ સહજાન્મરૂપે ॥૬૦॥
ભવતુ કિમપિ તત્ત્વં બ્રાહ્મમાભ્યન્તરં વા,
હૃદિ વિતરતિ સામ્યં નિર્મલશ્ચિદ્વિચારઃ।
તદિહ નિચિતપઞ્ચાચાર સઞ્ચારચારુ-
સ્ફુરિતપરમભાવે પક્ષપાતોઽધિકો નઃ ॥૬૧॥
સ્ફુટમપરમભાવે નૈગમસ્તારતમ્યમ્,
પ્રવદતુ ન તુ હૃષ્યેત્તાવતા જ્ઞાનયોગી।
કલિતપરમભાવં ચિચ્ચમત્કારસારમ્,
સકલનયવિશુદ્ધં ચિત્તમેકં પ્રમાણમ્ ॥૬૨॥
હરિરપરનયાનાં ગર્જિતૈઃ કુઞ્જરાણામ્,
સહજવિપિનસુપ્તો નિશ્ચયો નો બિભેતિ।
અપિ તુ ભવતિ લીલોજ્જૃમ્ભિજૃમ્ભોન્મુખેઽસ્મિન્ ગલિતમદભરાસ્તે નોચ્છ્વસન્ત્યેવ ભીતા ॥૬૩॥
કલિતવિવિધબાહ્યવ્યાપકોલાહલૌ-
ઘવ્યુપરમપરમાર્થે ભાવનાપાવનાનામ્।
ક્વચન કિમપિ શોચ્યં-નાસ્તિ નૈવાસ્તિ મોચ્યં,
ન ચ કિમપિ વિધેયં નૈવ ગેયં ન દેયમ્ ॥૬૪॥
ઇતિ સુપરિણતાત્મ-ખ્યાતિચાતુર્યકેલિર્ભવતિ યતિપતિર્યશ્ચિદ્ભરોદ્ભાસિવીર્યઃ।
હરિહિમકરહારસ્ફારમન્દારગઙ્ગા-
રજતકલશશુભ્રા સ્યાત્તદીયા યશઃશ્રી ॥૬૫॥

**દ્વિતીયોઽધિકારઃ સમાપ્ત**

યાન્યેવ સાધનાન્યાદૌ ગૃહ્ણીયાજ્જ્ઞાનસાધકઃ।
સિદ્ધયોગસ્ય તાન્યેવ લક્ષણાનિ સ્વભાવતઃ ॥૧॥
અત એવ જગૌ યાત્રાં સત્તપોનિયમાદિષુ।
યતનાં સોમિલપ્રશ્ને ભગવાન્ સ્વસ્ય નિશ્ચિતમ્ ॥૨॥
અતશ્ચૈવ સ્થિતપ્રજ્ઞભાવસાધનલક્ષણે।
અન્યૂનાભ્યધિકે પ્રોક્તે યોગદૃષ્ટ્યા પરૈરપિ ॥૩॥
નાજ્ઞાનિનો વિશેષ્યેત યથેચ્છાચરણે પુનઃ।

જ્ઞાની સ્વલક્ષણાભાવાત્તથા ચોક્તં પરૈરપિ ||૪||
બુદ્ધાऽદ્વૈતસતત્ત્વસ્ય યથેચ્છાચરણં યદિ|
શુનાં તત્ત્વદૃશાં ચૈવ કો ભેદોऽશુચિભક્ષણે ||૫||
અબુદ્ધિપૂર્વિકા વૃત્તિર્ન દુષ્ટા તત્ર યદ્યપિ|
તથાપિ યોગજાદૃષ્ટમહિમ્ના સા ન સમ્ભવેત્ ||૬||
નિવૃત્તમશુભાચારાચ્છુભાચારપ્રવૃત્તિમત્|
સ્યાદ્વા ચિત્તમુદાસીનં સામાયિકવતો મુનેઃ ||૭||
વિધયશ્ચ નિષેધાશ્ચ નત્વજ્ઞાનનિયન્ત્રિતાઃ|
બાલસ્યૈવાગમે પ્રોક્તો નોદ્દેશઃ પશ્યકસ્ય યત્ ||૮||
ન ચ સામર્થ્યયોગસ્ય યુક્તં શાસ્ત્રં નિયામકમ્|
કલ્પાતીતસ્ય મર્યાદાપ્યસ્તિ ન જ્ઞાનિનઃ ક્વચિત્ ||૯||
ભાવસ્ય સિદ્ધ્યસિદ્ધિભ્યાં યચ્ચાકિઞ્ચિત્કરી ક્રિયા|
જ્ઞાનમેવ ક્રિયામુક્તં રાજયોગસ્તદિષ્યતામ્ ||૧૦||
મૈવં નાકેવલી પશ્યો નાપૂર્વકરણં વિના|
ધર્મસંન્યાસયોગી ચેત્યન્યસ્ય નિયતા ક્રિયા ||૧૧||
સ્થૈર્યાધાનાય સિદ્ધસ્યાસિદ્ધસ્યાનયનાય ચ|
ભાવસ્યૈવ ક્રિયા શાન્તચિત્તાનામુપયુજ્યતે ||૧૨||
ક્રિયાવિરહિતં હન્ત જ્ઞાનમાત્રમનર્થકમ્|
ગતિં વિના પથજ્ઞોऽપિ નાપ્નોતિ પુરમીપ્સિતમ્ ||૧૩||
સ્વાનુકૂલાં ક્રિયાં કાલે જ્ઞાનપૂર્ણોऽપ્યપેક્ષતે|
પ્રદીપઃ સ્વ(સ?)પ્રકાશો (શે?)ऽપિ તૈલપૂર્ત્યાદિકં યથા||૧૪||
બાહ્યભાવં પુરસ્કૃત્ય યે ક્રિયાવ્યવહારતઃ|
વદને કવલક્ષેપં વિના તે તૃપ્તિકાઙ્ક્ષિણઃ ||૧૫||
ગુણવદ્બહુમાનાદેર્નિત્યસ્મૃત્યા ચ સત્ક્રિયા|
જાતં ન પાતયેદ્ભાવમજાતં જનયેદપિ ||૧૬||
ક્ષાયોપશમિકે ભાવે યા ક્રિયા ક્રિયતે તયા|
પતિતસ્યાપિ તદ્ભાવપ્રવૃદ્ધિર્જાયતે પુનઃ ||૧૭||
ગુણવૃદ્ધયૈ તતઃ કુર્યાત્ ક્રિયામસ્ખલનાય વા|
એકં તુ સંયમસ્થાનં જિનાનામવતિષ્ઠતે ||૧૮||
અજ્ઞાનનાશકત્વેન નનુ જ્ઞાનં વિશિષ્યતે|
ન હિ રજ્જાવહિભ્રાન્તિર્ગમને ન નિવર્તતે ||૧૯||
સત્યં ક્રિયાગમપ્રોક્તા જ્ઞાનિનોऽપ્યુપયુજ્યતે|
સઞ્ચિતાદૃષ્ટનાશાર્થં નાસૂરોऽપિ યદભ્યધાત્ ||૨૦||
તણ્ડુલસ્ય યથા વર્મ યથા તામ્રસ્ય કાલિકા|
નશ્યતિ ક્રિયયા પુત્ર પુરુષસ્ય તથા મલમ્ ||૨૧||
જીવસ્ય તણ્ડુલસ્યેવ મલં સહજમપ્યલમ્|
નશ્યત્યેવ ન સન્દેહસ્તસ્માદુદ્યમવાન્ ભવ ||૨૨||
અવિદ્યા ચ દિદૃક્ષા ચ ભવબીજં ચ વાસના|
સહજં ચ મલં ચેતિ પર્યાયાઃ કર્મણઃ સ્મૃતાઃ ||૨૩||
જ્ઞાનિનો નાસ્ત્યદૃષ્ટં ચેદ્ભસ્મસાત્કૃતકર્મણઃ|
શરીરમીશ્વરસ્યેવ વિદુષોऽપ્યવતિષ્ઠતે|
અન્યાદૃષ્ટવશનેતિ કશ્ચિદાહ તદક્ષમમ્ ||૨૫||
શરીરં વિદુષઃ શિષ્યાદ્યદૃષ્ટાદ્યદિ તિષ્ઠતિ|
તદાऽસુહૃદદૃષ્ટેન ન નશ્યેદિતિ કા પ્રમા ||૨૬||
ન ચોપાદાનનાશેऽપિ ક્ષણં કાર્યં યથેષ્યતે|
તાર્કિકૈઃ સ્થિતિમત્તદ્વચ્ચિરં વિદ્વત્તનુસ્થિતિઃ ||૨૭||

નિરુપાદાનકાર્યસ્ય ક્ષણં યત્તાર્કિકૈઃ સ્થિતિ।
નાશહેત્વન્તરાભાવાદિષ્ટા ન ચ સ દુર્વચઃ ॥૨૮॥
અન્યાદૃષ્ટસ્ય તત્પાતપ્રતિબન્ધકતાં નયેત્।
મ્રિયમાણોઽપિ જીવ્યેત શિષ્યાદૃષ્ટવશાદ્ગુરુઃ ॥૨૯॥
સ્વભાવાન્નિરૂપાદાનં યદિ વિદ્વત્તનુસ્થિતિઃ।
તથાપિ કાલનિયમે તત્ર યુક્તિર્ન વિદ્યતે ॥૩૦॥
ઉચ્છૃઙ્ખલસ્ય તચ્ચિન્ત્યં મંત વેદાન્તિનો હ્યદઃ।
પ્રારબ્ધાદૃષ્ટતઃ કિં તુ જ્ઞેયા વિદ્વત્તનુસ્થિતિઃ ॥૩૧॥
તત્પ્રારબ્ધેતરાદૃષ્ટં જ્ઞાનનાશ્યં યદીષ્યતે।
લાઘવેન વિજાતીયં તન્નાશ્યં તત્પ્રકલ્પ્યતામ્ ॥૩૨॥
ઇત્થં ચ જ્ઞાનિનો જ્ઞાનનાશ્યકર્મક્ષયે સતિ।
ક્રિયૈકનાશ્યકર્મૌઘક્ષયાર્થં સાપિ યુજ્યતે ॥૩૩॥
સર્વકર્મક્ષયે જ્ઞાનકર્મણોસ્તત્સમુચ્ચયઃ।
અન્યોઽન્યપ્રતિબન્ધેન તથા ચોક્તં પરૈરપિ ॥૩૪॥
ન યાવત્સમમભ્યસ્તૌ જ્ઞાનસત્પુરુષક્રમૌ।
એકોઽપિ નૈતયોસ્તાવત્પુરુષસ્યેહ સિધ્યતિ ॥૩૫॥
યથા છાદ્મસ્થિકે જ્ઞાનકર્મણી સહકૃ(ગ?)ત્વરે।
ક્ષાયિકે અપિ વિજ્ઞેયે તથૈવ મતિશાલિભિઃ ॥૩૬॥
સમ્પ્રાપ્તકેવલજ્ઞાના અપિ યજ્જિનપુઙ્ગવાઃ।
ક્રિયાં યોગનિરોધાંખ્યાં કૃત્વા સિધ્યન્તિ નાન્યથા ॥૩૭॥
તેન યે ક્રિયયા મુક્તા જ્ઞાનમાત્રાભિમાનિનઃ।
તે ભ્રષ્ટા જ્ઞાનકર્મભ્યાં નાસ્તિકા નાત્ર સંશયઃ ॥૩૮॥
જ્ઞાનોત્પત્તિં સમુદ્ભાવ્ય કામાદીનન્યદૃષ્ટિતઃ।
અપહ્નુવાનૈર્લોકેભ્યો નાસ્તિકૈર્વઞ્ચિતં જગત્ ॥૩૯॥
જ્ઞાનસ્ય પરિપાકાદ્ધિ ક્રિયાઽસઙ્ગત્વમઙ્ગતિ।
ન તુ પ્રયાતિ પાર્થક્યં ચન્દનાદિવ સૌરભમ્ ॥૪૦॥
પ્રીતિભક્તિવચોઽસંગૈરનુષ્ઠાનં ચતુર્વિધમ્।
યત્પરૈર્યોગિભિર્ગીતં તદિત્થં યુજ્યતેઽખિલમ્ ॥૪૧॥
જ્ઞાને ચૈવ ક્રિયાયાં ચ યુગપદ્વિહિતાદરઃ।
દ્રવ્યભાવવિશુદ્ધઃ સન્ પ્રયાત્યેવ પરં પદમ્ ॥૪૨॥
ક્રિયાજ્ઞાનસંયોગવિશ્રાન્તચિત્તાઃ
સમુદ્ભૂતબાધચારિત્રવૃત્તાઃ।
નયોન્મેષનિર્ણીતનિઃશેષભાવાસ્તપઃ
શક્તિલબ્ધપ્રસિદ્ધપ્રભાવાઃ ॥૪૩॥
ભયક્રોધમાયામદાજ્ઞાનનિદ્રા-
પ્રમાદોજ્ઝિતાઃ શુદ્ધમુદ્રા મુનીન્દ્રાઃ।
યશઃશ્રીસમાલિઙ્ગિતા વાદિદન્તિ-
સ્મયોચ્છેદહર્યક્ષતુલ્યા જયન્તિ ॥૪૪॥

**તૃતીયોઽધિકારઃ સમાપ્તઃ**

જ્ઞાનક્રિયાશ્વદ્વયયુક્તસામ્ય-રથાધિરૂઢઃ શિવમાર્ગગામી।
ન ગ્રામપૂઃકણ્ટકજારતીનાં જનોઽનુપાનત્ક ઇવાતિમેતિ ॥૧॥
આત્મપ્રવૃત્તાવતિજાગરૂકઃ પરપ્રવૃત્તૌ બધિરાન્ધમૂકઃ।
સદા ચિદાનન્દપદોપયોગી લોકોત્તરં સામ્યમુપૈતિ યોગી ॥૨॥
પરીષહૈશ્ચ પ્રબલોપસર્ગયોગાચ્ચલત્યેવ ન સામ્યયુક્તઃ।
સ્થૈર્યાદ્વિપર્યાસમુપૈતિ જાતુ ક્ષમા ન શૈલૈર્ન ચ સિન્ધુનાથૈઃ ॥૩॥

ઇતસ્તતો નારતિવહ્નિયોગા-
દુડ્ડીય ગચ્છેદ્યદિ ચિત્તસૂતઃ।
સામ્યૈકસિદ્ધૌષધમૂર્ચ્છિતઃ સન્,
કલ્યાણસિદ્ધેર્ન તદા વિલમ્બઃ ॥૪॥
અન્તર્નિમગ્નઃ સમતાસુખાબ્ધૌ બાહ્યે સુખે નો રતિમેતિ યોગી।
અટત્યટવ્યાં ક ઇવર્થલુબ્ધો ગૃહે સમુત્સર્પતિ કલ્પવૃક્ષે ॥૫॥
યસ્મિન્નવિદ્યાર્પિતબાહ્યવસ્તુવિસ્તારજભ્રાન્તિરુપૈતિ શાન્તિમ્।
તસ્મિંશ્ચિદેકાર્ણવનિસ્તરઙ્ગસ્વભાવસામ્યે રમતે સુબુદ્ધિઃ ॥૬॥
શુદ્ધાત્મતત્ત્વપ્રગુણા વિમર્શા સ્પર્શાખ્યસંવેદનમાદધાનાઃ।
યદાન્યબુદ્ધિં વિનિવર્તયન્તિ તદા સમત્વં પ્રથતેઽવશિષ્ટમ્ ॥૭॥
વિના સમત્વં પ્રસરન્મમત્વં,
સામાયિકં માયિકમેવ મન્યે।
આયે સમાનાં સતિ સદ્ગુણાનાં શુદ્ધં,
હિ તચ્છુદ્ધનયા વિદન્તિ ॥૮॥
નિશાનભોમન્દિરરત્નદીપ્રજ્યોતિર્ભિરુદ્દ્યોતિતપૂર્વમન્તઃ।
વિદ્યોતતે તત્પરમાત્મતત્ત્વં પ્રસૃત્વરે સામ્યમણિપ્રકાશે ॥૯॥
એકાં વિવેકાઙ્કુરિતાં શ્રિતા યાં,
નિર્વાણમાપુર્ભતાદિભૂપાઃ।
સૈવર્જુમાર્ગઃ સમતા મુનીનામન્યસ્તુ,
તસ્યા નિખિલઃ પ્રપઞ્ચઃ ॥૧૦॥
અલ્પેઽપિ સાધુર્ન કષાયવહ્નાવહ્નાય વિશ્વાસમુપૈતિ ભીતઃ।
પ્રવર્ધમાનઃ સ દહેદ્ગુણૌઘં સામ્યામ્બુપૂરૈર્યદિ નાપનીતઃ ॥૧૧॥
પ્રારબ્ધજા જ્ઞાનવતાં કષાયા,
આભાસિકા ઇત્યભિમાનમાત્રમ્।
નાશો હિ ભાવઃ પ્રતિસઙ્ખ્યયા,
યો નાબોધવત્સામ્યરતૌસ તિષ્ઠેત્ ॥૧૨॥
સામ્યં વિના યસ્ય તપઃક્રિયાદેર્નિષ્ઠા,
પ્રતિષ્ઠાર્જનમાત્ર એવ।
સ્વર્ધેનુચિન્તામણિકામકુમ્ભાન્,
કરોત્યસૌ કાણકપર્દમૂલ્યાન્ ॥૧૩॥
જ્ઞાની ક્રિયાવાન્ વિરતસ્તપસ્વી,
ધ્યાની ચ મૌની સ્થિરદર્શનશ્ચ।
સાધુર્ગુણં તં લભતે ન જાતુ,
પ્રાપ્નોતિ યં સામ્યસમાધિનિષ્ઠઃ ॥૧૪॥
દુર્યોધનેનાભિહતશ્ચુકોપ ન પાણ્ડવૈર્યો ન નુતો જહર્ષ।
સ્તુમો ભદન્તં દમદન્તમન્તઃસમત્વન્તં મુનિસત્તમં તમ્ ॥૧૫॥
યો દહ્યમાનાં મિથિલાં નિરીક્ષ્ય શક્રેણ,
નુન્નોઽપિ નમિઃ પુરીં સ્વામ્।
ન મેઽત્ર કિઞ્ચિજ્જ્વલતીતિ મેને,
સામ્યેન તેનોરુયશો વિતેને ॥૧૬॥
સામ્યપ્રસાદાસ્તવપુર્મમત્વાઃ,
સત્ત્વાધિકાઃ સ્વં ધ્રુવમેવ મત્વા।
ન સેહિરેઽર્તિ કિમુ તીવ્રયન્ત્ર-

નિષ્પીડિતાઃ સ્કન્ધકસૂરિશિષ્યાઃ ॥૧૭॥
લોકોત્તરં ચારુચરિત્રમેતન્મેતાર્યસાધોઃ સમતાસમાધેઃ।
હૃદાપ્યકુપ્યન્ન યદાર્દ્રચર્મબદ્ધેઽપિ મૂર્ધન્યયમાપ તાપમ્ ॥૧૮॥
જજ્વાલ નાન્તશ્ચ સુરાધમેન,
પ્રોજ્જ્વાલિતેઽપિ જ્વલનેન મૌલૌ।
મૌલિર્મુનીનાં સ ન કૈર્નિષેવ્યઃ
કૃષ્ણાનુજન્મા સમતાઽમૃતાબ્ધિઃ ॥૧૯॥
ગઙ્ગાજલે યો ન જહૌ સુરેણ,
વિદ્ધોઽપિ શૂલે સમતાનુવેધમ્।
પ્રયાગતીર્થોદયકૃન્મુનીનાં માન્યઃ
સ સૂરિસ્તનુજોઽન્નિકાયાઃ ॥૨૦॥
સ્ત્રીભ્રૂણગોબ્રાહ્મણઘાતજાતપાપાદધઃપાતકૃતાભિમુખ્યાઃ।
દૃઢપ્રહારિપ્રમુખાઃ ક્ષણેન સામ્યાવલમ્બાત્પદમુચ્ચમાપુઃ ॥૨૧॥
અપ્રાપ્તધર્માઽપિ પુરાઽઽદિમાર્હન્માતા,
શિવં યદ્ભગવત્યવાપ।
નાપ્નોતિ પારં વચસોઽનુપાધિ-
સમાધિસામ્યસ્ય વિજૃમ્ભિતં તત્ ॥૨૨॥
ઇતિ શુભમતિર્મત્વા સામ્યપ્રભાવમનુત્તરં ય ઇહ નિરતો નિત્યાનન્દઃ કદાપિ ન ખિદ્યતે।
વિગલદખિલાવિદ્યઃ પૂર્ણસ્વભાવસમૃદ્ધિમાન્,
સ ખલુ લભતે ભાવારીણાં જયેન યશઃશ્રિયમ્ ॥૨૩॥

**ચતુર્થોઽધિકારઃ સમાપ્ત**

**॥ સમાપ્તમિદં યશઃશ્યઙ્કમધ્યાત્મોપનિષત્પ્રકરણમ્ ॥**

**સહસ્રાવધાનિશ્રીમુનિસુન્દરસૂરિવિરચિત**

# અધ્યાત્મ કલ્પદ્રુમ

જયશ્રીરાંતરારીણાં, લેભે યેન પ્રશાંતિતઃ।
તં શ્રીવીરજિનં નત્વા, રસઃ શાંતો વિભાવ્યતે ॥૧॥
સર્વમંગલનિધૌ હૃદિ યસ્મિન્,
સંગતે નિરુપમં સુખમેતિ।
મુક્તિશર્મ ચ વશીભવતિ દ્રાક્,
તં બુધા ભજત શાંતરસેંદ્રમ્ ॥૨॥
સમતૈકલીનચિત્તો, લલનાપત્યસ્વદેહમમતામુક્।
વિષયકષાયાદ્યવશઃ શાસ્ત્રગુણૈર્દમિતચેતસ્કઃ ॥૩॥
વૈરાગ્યશુદ્ધધર્મા દેવાદિસતત્ત્વવિદ્વિરતિધારી।
સંવરવાન્ શુભવૃત્તિઃ સામ્યરહસ્યં ભજ શિવાર્થિન્ ॥૪॥ યુગ્મમ્।

**અથ પ્રથમઃ સમતાધિકારઃ**

ચિત્તબાલક મા ત્યાક્ષીરજસ્રં ભાવનૌષધીઃ।
યત્ત્વાં દુર્ધ્યાનભૂતાનછલયન્તિ છલાન્વિષઃ ॥૫॥
યદિંદ્રિયાર્થૈઃ સકલૈઃ સુખં સ્યાન્નરેન્દ્રચક્રિત્રિદશાધિપાનામ્।
તદ્બિંદવત્યેવ પુરો હિ સામ્યસુધાંબુધેસ્તેન તમાદ્રિયસ્વ ॥૬॥
અદૃષ્ટવૈચિત્ર્યવશાજ્જગજ્જને,
વિચિત્રકર્માશયવાગ્વિસંસ્થુલે।
ઉદાસંવૃત્તિસ્થિતચિત્તવૃત્તયઃ,
સુખં શ્રયંતે યતયઃ ક્ષતાર્તયઃ ॥૭॥
વિશ્વજંતુષુ યદિ ક્ષણમેકં, સામ્યતો ભજસિ માનસ મૈત્રીમ્।
તત્સુખં પરમમત્ર પરત્રાપ્યશ્નુષે ન યદભૂત્તવ જાતુ ॥૮॥

ન યસ્ય મિત્રં ન ચ કોઽપિ શત્રુર્નિજઃ
પરો વાપિ ન કશ્ચનાસ્તે।
ન ચેન્દ્રિયાર્થેષુ રમેત ચેતઃ
કષાયમુક્તઃ પરમઃ સ યોગી ॥૯॥
ભજસ્વ મૈત્રીં જગદઙ્ગિરાશિષુ,
પ્રમોદમાત્મન્ ગુણિષુ ત્વશેષતઃ।
ભવાર્તિદીનેષુ કૃપારસં સદાપ્યુદાસ-
ıવૃત્તિં ખલુ નિર્ગુણેષ્વપિ ॥૧૦॥
મૈત્રી પરસ્મિન્ હિતધીઃ સમગ્રે, ભવેત્પ્રમોદો ગુણપક્ષપાતઃ।
કૃપા ભવાર્ત્તે પ્રતિકર્તુમીહોપેક્ષૈવ માધ્યસ્થ્યમવાર્યદોષે ॥૧૧॥
પરહિતચિન્તામૈત્રી, પરદુઃખવિનાશિની તથા કરુણા।
પરસુખતુષ્ટિર્મુદિતા, પરદોષોપેક્ષણમુપેક્ષા ॥૧૨॥
મા કાર્ષીત્કોઽપિ પાપાનિ, મા ચામૂત્કોઽપિ દુઃખિતઃ।
મુચ્યતાં જગદપ્યેષા, મતિર્મૈત્રી નિગદ્યતે ॥૧૩॥
અપાસ્તાશેષદોષાણાં, વસ્તુતત્ત્વાવલોકિનામ્।
ગુણેષુ પક્ષપાતો યઃ, સ પ્રમોદઃ પ્રકીર્તિતઃ ॥૧૪॥
દીનેષ્વાર્તેષુ ભીતેષુ, યાચમાનેષુ જીવીતમ્।
પ્રતિકારપરા બુદ્ધિઃ, કારુણ્યમભિધીયતે ॥૧૫॥
ક્રૂરકર્મસુ નિશંકં દેવતાગુરુનિંદિષુ।
આત્મશંસિષુ, યોપેક્ષા, તન્માધ્યસ્થ્યમુદીરિતમ્ ॥૧૬॥
ચેતનેતરગતેષ્વખિલેષુ,
સ્પર્શરૂપરવગંધરસેષુ।
સામ્યમેષ્યતિ યદા તવ ચેતઃ,
પાણિગં શિવસુખં હિ યદાત્મન્ ॥૧૭॥
કે ગુણાસ્તવ યતઃ સ્તુતિમિચ્છસ્યભ્દુતં
કિમકૃથા મદવાન્ યત્।
કૈર્ગતા નરકભીઃ સુકૃતૈસ્તે,
કિં જિતઃ પિતૃપતિર્યદચિન્તઃ ॥૧૮॥
ગુણસ્તવૈર્યો ગુણિનાં પરેષા-
માક્રોશનિંદાદિભિરાત્મનશ્ચ।
મનઃ સમં શીલતિ મોદતે વા,
ખિદ્યે ત ચ વ્યત્યયતઃ સ વેત્તા ॥૧૯॥
ન વેત્સિ શત્રૂન્ સુહૃદશ્ચ નૈવ,
હિતાહિતે સ્વં ન પરં ચ જન્તોઃ।
દુખં દ્વિષન્ વાંછસિ શર્મ
ચૈતન્નિદાનમૂઢઃ કથમાપ્સ્યસીષ્ટમ્ ॥૨૦॥
કૃતી હિ સર્વં પરિણામરમ્યં,
વિચાર્ય ગૃહ્ણાતિ ચિરસ્થિતીહ।
ભવાન્તરેઽનન્તસુખાપ્તયે તદ્,
આત્મન્ કિમાચારમિમં જહાસિ ॥૨૧॥
નિજઃ પરો વેતિ કૃતો વિભાગો, રાગદિભિસ્તેત્વરયસ્તવાત્મન્।
ચતુર્ગતિક્લેશવિધાનતસ્તત્,
પ્રમાણયન્નસ્યરિનિર્મિતં કિમ્ ॥૨૨॥
અનાદિરાત્મા ન નિજઃ પરો વા,
કસ્યાપિ કશ્ચિન્ન રિપુઃ સુહૃદ્વા।
સ્થિરા ન દેહાકૃતયોઽણવશ્ચ,

તથાપિ સામ્યં કિમુપૈષિ નૈષુ ॥૨૩॥
યથા વિદાં લેપ્યમયા ન તત્ત્વાત્,
સુખાય માતાપિતૃપુત્રદારાઃ।
તથા પરેઽપીહ વિશીર્ણતત્તદાકાર-
મેતદ્ધિ સમં સમગ્રમ્ ॥૨૪॥
જાનન્તિ કામાન્નિખિલાઃ સસંજ્ઞાઃ,
અર્થં નરાઃ કેઽપિ ચ કેઽપિ ધર્મમ્।
જૈનં ચ કેચિદ્ ગુરુદેવશુદ્ધં,
કેચિત્ શિવં કેઽપિ ચ કેઽપિ સામ્યમ્ ॥૨૫॥
સ્નિહ્યન્તિ તાવદ્ધિ નિજા નિજેષુ,
પશ્યન્તિ યાવન્નિજમર્થમેભ્યઃ।
ઇમાં ભવેઽત્રાપિ સમીક્ષ્ય રીતિં,
સ્વાર્થે ન કઃ પ્રેત્ય હિતે યતેત ॥૨૬॥
સ્વપ્નેંદ્રજાલાદિષુ યદ્વદાપ્તૈ રોષશ્ચ,
તોષશ્ચ મુધા પદાર્થૈઃ।
તથા ભવેઽસ્મિન્ વિષયૈઃ સમસ્તૈરેવં,
વિભાવ્યાત્મલયેઽવધેહિ ॥૨૭॥
એષ મે જનયિતા જનનીયં,
બન્ધવઃ પુનરિમે સ્વજનાશ્ચ।
દ્રવ્યમેતદિતિ જાતમમત્વો,
નૈવ પશ્યસિ કૃતાંતવશત્વમ્ ॥૨૮॥
નો ધનૈઃ પરિજનૈઃ સ્વજનૈર્વા,
દૈવતૈઃ પરિચિતૈરપિ મન્ત્રૈઃ।
રક્ષ્યતેઽત્ર ખલુ કોઽપિ કૃતાંતાન્નો,
વિભાવયસિ મૂઢ કીમેવમ્ ॥૨૯॥
તૈર્ભવેઽપિ યદહો સુખમિચ્છંસ્તસ્ય,
સાધનતયા પ્રતીભાતૈઃ।
મુહ્યસિ પ્રતિકલં વિષયેષુ,
પ્રીતિમેષિ ન તુ સામ્યતત્ત્વે ॥૩૦॥ (અર્થતો યુગ્મમ્)
કિં કષાયકલુષં કુરુષે સ્વં,
કેષુ ચીન્નનુ મનોઽરીધિયાત્મન્।
તેઽપી તે હિ જનકાદીકરૂપૈરીષ્ટતાં,
દધુરનન્તભવેષુ ॥૩૧॥
યાંશ્ચ શોચસિ ગતાઃ કીમિમે મે,
સ્નેહલા ઇતી ધિયા વિધુરાત્મા।
તૈર્ભવેષુ નીહતસ્ત્વમનંતેષ્વેવ,
તેઽપિ નિહતા ભવતા ચ ॥૩૨॥
ત્રાતું ન શક્યા ભવદુઃખતો યે,
ત્વયા ન યે ત્વામપિ પાતુમીશાઃ।
મમત્વમેતેષુ દધન્મુધાત્મન્,
પદે પદે કિં શુચમેષિ મૂઢ ॥૩૩॥
સચેતનાઃ પુદ્ગલપિંડજીવા,
અર્થાઃ પરે ચાણુમયા દ્વયેઽપિ।
દધત્યનંતાન્ પરીણામભાવાંસ્તત્તેષુ,
કસ્ત્વર્હતિ રાગરોષૌ ॥૩૪॥

## અથ દ્વિતીયઃ સ્ત્રીમમત્વમોચનાધિકારઃ

મુહ્યસિ પ્રણયચારુગિરાસુ,
પ્રીતિતઃ પ્રણયિનીષુ કૃતિંસ્ત્વમ્।
કિં ન વેત્સિ પતતાં ભવાર્દ્ધૌ,
તા નૃણાં ખલુ શિલા ગલબદ્ધાઃ ॥૧॥
ચર્માસ્થિમજ્જાન્ત્રવસાસ્રમાંસા-
મેધ્યાદ્યશુચ્યસ્થિરપુદ્ગલાનામ્।
સ્ત્રીદેહપિંડાકૃતિસંસ્થિતેષુ,
સ્કંધેષુ કિં પશ્યસિ રમ્યમાત્મન્ ॥૨॥
વિલોક્ય દૂરસ્થમમેધ્યમલ્પં, જુગુપ્સસે મોટિતનાસિકસ્ત્વમ્।
ભૃતેષુ તેનૈવ વિમૂઢ યોષાવપુઃષુ તત્કિં કુરુષેઽભિલાષમ્ ॥૩॥
અમેધ્યમાંસાસ્રવસાત્મકાનિ, નારીશરીરાણિ નિષેવમાણાઃ।
ઇહાપ્યપત્યદ્રવિણાદિચિંતાતાપાન્ પરત્ર પ્રતિ દુર્ગતીંશ્ચ ॥૪॥
અઙ્ગેષુ યેષુ પરિમુહ્યસિ કામિનીનાં,
ચેતઃ પ્રસીદ વિશ ચ ક્ષણમંતરેષામ્।
સમ્યક્ સમીક્ષ્ય વિરમાશુચિપિંડકેભ્યસ્તેભ્યશ્ચ શુચ્યશુચિવસ્તુવિચારમિચ્છન્ ॥૫॥
વિમુહ્યસિ સ્મેરદૃશઃ સુમુખ્યા,
મુખેક્ષણાદીન્યભિવીક્ષમાણઃ।
સમીક્ષસે નો નરકેષુ તેષુ,
મોહોદ્ભવા ભાવિકદર્થનાસ્તાઃ ॥૬॥
અમેધ્યભસ્ત્રા બહુરંધ્રનિર્યન્મલાવિલોદ્યત્કૃમિજાલકીર્ણા।
ચાપલ્યમાયાનૃતવંચિકા સ્ત્રી, સંસ્કારમોહાન્નરકાવ્ય ભુક્તા ॥૭॥
નિર્ભૂમિર્વિષકંદલી ગતદરી વ્યાઘ્રી નિરાહ્વો મહાવ્યાધિર્મૃત્યુરકારણશ્ચ લલનાઽનભ્રા ચ વજ્રાશનિઃ।
બંધુસ્નેહવિઘાતસાહસમૃષાવાદાદિસંતાપભૂઃ, પ્રત્યક્ષાપિ ચ રાક્ષસીતિ બિરુદૈઃ ખ્યાતાઽઽગમે ત્યજ્યતામ્ ॥૮॥

## અથ તૃતીયોઽપત્યમમત્વમોચનાધિકારઃ

મા ભૂરપત્યાન્યવલોકમાનો,
મુદાકુલો મોહનૃપારિણા યત્।
ચિક્ષિપ્સયા નારકચારકેઽસિ,
દૃઢં નિબદ્ધો નિગડૈરમીભિઃ ॥૧॥
આજીવિતં જીવ ભવાન્તરેઽપિ વા,
શલ્યાન્યપત્યાનિ ન વેત્સિ કિં હૃદિ।
ચલાચલૈર્યૈર્વિવિધાર્તિદાનતોઽનિશં,
નિહન્યેત સમાધિરાત્મનઃ ॥૨॥
કુક્ષૌ યુવત્યાઃ કૃમયો વિચિત્રા,
અપ્યસ્રશુક્રપ્રભવા ભવન્તિ।
ન તેષુ તસ્યા નહિ તત્પતેશ્ચ,
રાગસ્તતોઽયં કિમપત્યકેષુ ॥૩॥
ત્રાણાશક્તેરાપદિ સંબંધાનંત્યતો મિથોઽઙ્ગવતામ્।

સંદેહાચ્ચોપકૃતેર્માપત્યેષુ સ્નિહો જીવ ॥૪॥

## અથ ચતુર્થો ધનમમત્વમોચનાધિકારઃ

યાઃ સુખોપકૃતિકૃત્વધિયા ત્વં,
મેલયન્નસિ રમા મમતાભાક્।
પાપ્મનોऽધિકરણત્વત એતા,
હેતવો દદતિ સંસૃતિપાતમ્ ॥૧॥
યાનિ દ્વિષામપ્યુપકારકાણિ,
સર્પોન્દુરાદિષ્વપિ યૈર્ગતિશ્ચ।
શક્યા ચ નાપન્મરણામયાદ્યા,
હન્તું ધનેષ્વેષુ ક એવ મોહઃ ॥૨॥
મમત્વમાત્રેણ મનઃપ્રસાદસુખં,
ધનૈરલ્પકમલ્પકાલમ્।
આરંભપાપૈઃ સુચિરં તુ દુઃખં,
સ્યાદુર્ગતૌ દારુણમિત્યવેહિ ॥૩॥
દ્રવ્યસ્તવાત્મા ધનસાધનો,
ન ધર્મોऽપિ સારંભતયાતિશુદ્ધઃ।
નિઃસંગતાત્મા ત્વતિશુદ્ધયોગાત્,
મુક્તિશ્રિયં યચ્છતિ તદ્ભવેऽપિ ॥૪॥
ક્ષેત્રવાસ્તુધનધાન્યગવાશ્વૈર્મેલિતૈઃ
સનિધિભિસ્તનુભાજામ્।
ક્લેશપાપનરકાભ્યધિકઃ સ્યાત્કો,
ગુણો ન યદિ ધર્મનિયોગઃ ॥૫॥
આરંભૈર્ભરિતો નિમજ્જતિ યતઃ પ્રાણી ભવાંભોનિધાવીહંતે કુનૃપાદયશ્ચ પુરુષા યેન ચ્છલાદ્બાધિતુમ્।
ચિંતાવ્યાકુલતાકૃતેશ્ચ હરતે યો ધર્મકર્મસ્મૃતિં, વિજ્ઞા!
ભૂરિપરિગ્રહં ત્યજત તં ભોગ્યં પરૈઃ પ્રાયશઃ ॥૬॥
ક્ષેત્રેષુ નો વપસિ યત્સદપિ સ્વમેતદ્યાતાસિ,
તત્પરભવે કિમિદં ગૃહીત્વા।
તસ્યાર્જનાદિજનિતાઘચયાર્જિતાત્તે,
ભાવી કથં નરકદુઃખભરાચ્ચમોક્ષઃ ॥૭॥

## અથ પંચમો દેહમમત્વમોચનાધિકારઃ

પુષ્ણાસિ યં દેહમધાન્યચિંતયંસ્તવોપકારં,
કમયં વિધાસ્યતિ।
કર્માણિ કુર્વન્નિતિ ચિંતયાયતિં,
જગત્યયં વંચયતે હિ ધૂર્ત્તરાટ્ ॥૧॥
કારાગૃહાદ્બહુવિધાશુચિતાદિદુઃખાન્નિર્ગંતુમિચ્છતિ,
જડોऽપિ હિ તદ્વિભિદ્ય।
ક્ષિપ્તસ્તતોऽધિકતરે વપુષિ સ્વકર્મવ્રાતેન,
તદ્દ્રઢયિતું યતસે કિમાત્મન્ ॥૨॥
ચેદ્વાંછસીદમવિતું પરલોકદુઃખભીત્યા,

તતો ન કુરુષે કિમુ પુણ્યમેવ।
શક્યં નરક્ષિતુમિદં હિ ન દુઃખભીતિઃ
પુણ્યં વિના ક્ષયમુપૈતિ ચ વજ્રિણોઽપિ ॥૩॥
દેહે વિમુહ્ય કુરુષે કિમઘં ન વેત્સિ,
દેહસ્થ એવ ભજસે ભવદુઃખજાલમ્।
લોહાશ્રિતો હિ સહતે ઘનઘાતમગ્નિર્બાધા,
ન તેઽસ્ય ચ નભોવદનાશ્રયત્વે ॥૪॥
દુષ્ટઃ કર્મવિપાકભૂપતિવશઃ કાયાહ્વયઃ,
કર્મકૃત્, બદ્ધ્વા કર્મગુણૈર્હૃષીકચષકૈઃ પીતપ્રમાદાસવમ્।
કૃત્વા નારકચારકાપદુચિતં ત્વાં પ્રાપ્ય ચાશુ ચ્છલં,
ગન્તેતિ સ્વહિતાય સંયમભરં તં વાહયાલ્પં દદત્ ॥૫॥
યતઃ શુચીન્યપ્યશુચીભવન્તિ।
કૃમ્યાકુલાત્કાકશુનાદિભક્ષ્યાત્।
દ્રાગ્ભાવિનો ભસ્મતયા તતોઽઙ્ગાત્,
માંસાદિપિંડાત્ સ્વહિતં ગૃહાણ ॥૬॥
પરોપકારોઽસ્તિ તપો જપો વા,
વિનશ્વરાદ્યસ્ય ફલં ન દેહાત્।
સભાટકાદલ્પદિનાપ્તગેહ-
મૃત્પિંડમૂઢઃ ફલમશ્નુતે કિમ્ ॥૭॥
મૃત્પિંડરૂપેણ વિનશ્વરેણ,
જુગુપ્સનીયેન ગદાલયેન।
દેહેન ચેદાત્મહિતં સુસાધં,
ધર્માન્ન કિં તદ્યતસેઽત્ર મૂઢ! ॥૮॥

## અથ ષષ્ઠો વિષયપ્રમાદત્યાગાધિકારઃ

અત્યલ્પકલ્પિતસુખાય કિમિન્દ્રિયાર્થૈસ્ત્વં,
મુહ્યસિ પ્રતિપદં પ્રચુર પ્રમાદઃ।
એતે ક્ષિપન્તિ ગહને ભવભીમકક્ષે,
જંતુન્ન યત્ર સુલભા શિવમાર્ગદૃષ્ટિઃ ॥૧॥
આપાતરમ્યે પરિણામદુઃખે,
સુખે કથં વૈષયિકે રતોઽસિ।
જડોઽસિ કાર્યં રચયન્ હિતાર્થી,
કરોતિ વિદ્વન્ યદુદર્કતર્કમ્ ॥૨॥
યદિન્દ્રિયાર્થૈરિહ શર્મ બિંદુવદ્યદર્ણ-
વત્સ્વઃશિવગં પરત્ર ચ।
તયોર્મિથોઽસ્તિ પ્રતિપક્ષતા કૃતિન્,
વિશેષદૃષ્ટ્યાન્યતરદ્ ગૃહાણ તત્ ॥૩॥
ભુંક્તે કથં નારકતિર્યગાદિદુઃખાનિ,
દેહીત્યવધેહિ શાસ્ત્રૈઃ।
નિવર્તતે તે વિષયેષુ તૃષ્ણા,
બિભેષી પાપપ્રચયાચ્ચ યેન ॥૪॥
ગર્ભવાસનરકાદિવેદનાઃ,

પશ્યતોઽનવરતં શ્રુતેક્ષણૈઃ।
નો કષાયવિષયેષુ માનસં,
શ્લિષ્યતે બુધ વિચિંતયેતિ તાઃ ॥૫॥
વધ્યસ્ય ચૌરસ્ય યથા પશોર્વા,
સંપ્રાપ્યમાણસ્ય પદં વધસ્ય।
શનૈઃ શનૈરેતિ મૃતિઃ સમીપં,
તથાખિલસ્યેતિ કથં પ્રમાદઃ ॥૬॥
બિભેષિ જંતો! યદિ દુઃખરાશેસ્તદિં-
દ્રિયાર્થેષુ રતિં કૃથા મા।
તદુદ્ભવં નશ્યતિ શર્મ યદ્રાક્,
નાશે ચ તસ્ય ધ્રુવમેવ દુઃખમ્ ॥૭॥
મૃતઃ કિમુ પ્રેતપતિર્દુરામયા,
ગતાઃ ક્ષયં કિં નરકાશ્ચ મુદ્રિતાઃ।
ધ્રુવાઃ કિમાયુર્ધનદેહબંધવઃ,
સકૌતુકો યદ્વિષયૈર્વિમુહ્યસિ ॥૮॥
વિમોહ્યસે કિં વિષયપ્રમાદૈ-
ર્ભ્રમાત્સુખસ્યાયતિદુઃખરાશેઃ।
તદ્ગર્ધમુક્તસ્ય હિ યત્સુખં તે-
ગતોપમં ચાયતિમુક્તિદં તત્ ॥૯॥

## અથ સપ્તમઃ કષાયત્યાગાધિકારઃ

રે જીવ! સેહિથ સહિષ્યસિ ચ વ્યથાસ્તાસ્ત્વં,
નારકાદિષુ પરાભવભૂઃ કષાયૈઃ।
મુગ્ધોદિતૈઃ કુવચનાદિભિરપ્યતઃ કિં,
ક્રોધાન્નિહંસિ નિજપુણ્યધનં દુરાપમ્ ॥૧॥
પરાભિભૂતૌ યદિ માનમુક્તિ-
સ્તતસ્તપોઽખંડમતઃ શિવં વા।
માનાદ્દતિર્દુર્વચનાદિભિશ્ચેત્તપઃ
ક્ષયસ્તન્નરકાદિ દુઃખમ્ ॥૨॥
વૈરાદિ ચાત્રેતિ વિચાર્ય લાભાલાભૌ,
કૃતિન્નાભવસંભવિન્યામ્।
તપોઽથવા માનમવા(થા?) ભિ-
ભૂતાવિહાસ્તિ નૂનં હિ ગતિર્દ્વિધૈવ ॥૩॥
શ્રુત્વાક્રોશાન્ યો મુદા પૂરિતઃ સ્યાત્,
લોષ્ટાદ્યૈર્યશ્ચાહતો રોમહર્ષી।
યઃ પ્રાણાન્તેઽપ્યન્યદોષં ન પશ્યત્યેષ,
શ્રેયો દ્રાગ્ લભેતૈવ યોગી ॥૪॥
કો ગુણસ્તવ કદા ચ કષાયૈર્નિર્મમે,
ભજસિ નિત્યમિમાન્ યત્।
કિં ન પશ્યાસિ દોષમમીષાં,
તાપમત્ર નરકં ચ પરત્ર ॥૫॥
યત્કષાયજનિતં તવ સૌખ્યં,
યત્કષાયપરિહાનિભવં ચ।
તદ્વિશેષમથવૈતદુદર્કં,
સંવિભાવ્ય ભજ ધીર વિશિષ્ટમ્ ॥૬॥

સુખેન સાધ્યા તપસાં પ્રવૃત્તિર્યથા,
તથા નૈવ તુ માનમુક્તિઃ।
આદ્યા ન દત્તેઽપિ શિવં પરા તુ,
નિદર્શનાદ્બાહુબલેઃ પ્રદત્તે ॥૭॥
સમ્યગ્વિચાર્યેતિ વિહાય માનં,
રક્ષન્ દુરાપાણિ તપાંસિ યત્નાત્।
મુદા મનીષી સહતેઽભિભૂતીઃ,
શૂરઃ ક્ષમાયામપિ નીચજાતાઃ ॥૮॥
પરાભિભૂત્યાલ્પિકયાપિ કુપ્યસ્ય-
ધૈરપીમાં પ્રતિકર્તુમિચ્છન્।
ન વેત્સિ તિર્યઙ્નરકાદિકેષુ,
તાસ્તૈરનંતાસ્ત્વતુલા ભવિત્રીઃ ॥૯॥
ધત્સે કૃતિન્! યદ્યપકારકેષુ,
ક્રોધં તતો ધેહ્યરિષટ્ક એવ।
અથોપકારિષ્વપિ તદ્ભવાર્તિકૃત્-
કર્મહૃન્મિત્રબહિર્દ્વિષત્સુ ॥૧૦॥
અધીત્યનુષ્ઠાનતપઃશમાદ્યાન્,
ધર્માન્ વિચિત્રાન્ વિદધત્સમાયાન્।
ન લપ્સ્યસે તત્ફલમાત્મદેહ-
ક્લેશાધિકં તાંશ્ચ ભવાંતરેષુ ॥૧૧॥
સુખાય ધત્સે યદિ લોભમાત્મનો,
જ્ઞાનાદિરત્નત્રિતયે વિધેહિ તત્।
દુઃખાય ચેદત્ર પરત્ર વા કૃતિન્,
પરિગ્રહે તદ્બહિરાંતરેઽપિ ચ ॥૧૨॥
કરોષિ યત્પ્રેત્યહિતાય કિંચિત્,
કદાચિદલ્પં સુકૃતં કથંચિત્।
માઽજીહરસ્તન્મદમત્સરાદ્યૈર્વિના-
ચ તન્મા નરકાતિથિર્ભૂઃ ॥૧૩॥
પુરાપિ પાપૈઃ પતિતોઽસિ સંસૃતૌ,
દધાસિ રે કિં ગુણિમત્સરં પુનઃ।
ન વેત્સિ કિં ઘોરજલે નિપાત્યસે,
નિયંત્ર્યસે શૃંખલયા ચ સર્વતઃ ॥૧૪॥
કષ્ટેન ધર્મો લવશો મિલત્યયં,
ક્ષયં કષાયૈર્યુગપત્ પ્રયાતિ ચ।
અતિપ્રયત્નાર્જિતમર્જુનં તતઃ,
કિમજ્ઞ! હી હારયસે નભસ્વાતા ॥૧૫॥
શત્રૂભવન્તિ સુહૃદઃ કલુષીભવન્તિ,
ધર્મા યશાંસિ નિચિતાયશસીભવન્તિ।
સ્નિહ્યન્તિ નૈવ પિતરોઽપિ ચ બાંધવાશ્ચ,
લોકદ્વયેઽપિ વિપદો ભવિનાં કષાયૈઃ ॥૧૬॥
રૂપલાભકુલવિક્રમવિદ્યાશ્રીતપોવિતરણપ્રભુતાદ્યૈઃ।
કિં મદં વહસિ વેત્સિ ન,
મૂઢાઽનંતશઃ સ્વભૃશલાઘવદુઃખમ્ ॥૧૭॥
વિના કષાયાન્ન ભવાર્ત્તિરાશિર્ભવેદ્-

ભવેદેવ ચ તેષુ સત્સુ।
મૂલં હિ સંસારતરોઃ કષાયાસ્તત્તાન્,
વિહાયૈવ સુખી ભવાત્મન્ ॥૧૮॥
સમીક્ષ્ય તિર્યઙ્નરકાદિવેદનાઃ,
શ્રુતેક્ષણૈર્ધર્મદુરાપતાં તથા।
પ્રમોદસે યદ્વિષયૈઃ સકૌતુકૈસ્તતસ્તવાત્મન્!
વિફલૈવ ચેતના ॥૧૯॥
ચૌરૈસ્તથા કર્મકરૈર્ગૃહીતે,
દુષ્ટૈઃ સ્વમાત્રેઽપ્યુપતપ્યસે ત્વમ્।
પુષ્ટૈઃ પ્રમાદૈસ્તનુભિશ્ચ પુણ્યધનં,
ન કિં વેત્સ્યપિ લુટ્યમાનમ્ ॥૨૦॥
મૃત્યોઃ કોઽપિ ન રક્ષિતો ન જગતો દારિદ્યમુત્રાસિતં, રોગસ્તેનનૃપાદિજા ન ચ ભિયો નિર્ણાશિતાઃ ષોડશ। વિધ્વસ્તા નરકા ન નાપિ સુખિતા ધર્મૈસ્ત્રિલોકી સદા, તત્કો નામ ગુણો મદશ્ચ વિભુતા કા તે સ્તુતીચ્છા ચ કા ॥૨૧॥

## અથાષ્ટમઃ શાસ્ત્રગુણાધિકારઃ

શિલાતલાભે હૃદિ તે વહંતિ,
વિશંતિ સિદ્ધાન્તરસા ન ચાન્તઃ।
યદત્ર નો જીવદયાર્દ્રતા તે,
ન ભાવનાંકુરતતિશ્ચ લભ્યા ॥૧॥
યસ્યાગમાંભોદરસૈર્ન ધૌતઃ,
પ્રમાદપંકઃ સ કથં શિવેચ્છુઃ।
રસાયનૈર્યસ્ય ગદાઃ ક્ષતા નો,
સુદુર્લભં જીવિતમસ્ય નૂનમ્ ॥૨॥
અધીતિનોઽર્ચાદિકૃતે જિનાગમઃ,
પ્રમાદિનો દુર્ગતિપાપતેર્મુધા।
જ્યોતિર્વિમૂઢસ્ય હિ દીપપાતિનો,
ગુણાય કસ્મૈ શલભસ્ય ચક્ષુષી ॥૩॥
મોદન્તે બહુતર્કતર્કણચણાઃ કેચિજ્જયાદ્વાદિનાં,
કાવ્યૈઃ કેચન કલ્પિતાર્થઘટનૈસ્તુષ્ટાઃ કવિખ્યાતિતઃ।
જ્યોતિર્નાટકનીતિલક્ષણધનુર્વેદાદિશાસ્ત્રૈઃ પરે,
બ્રૂમઃ પ્રેત્યહિતે તુ કર્મણિ જડાન્ કુક્ષિંભરીનેવ તાન્ ॥૪॥
કિં મોદસે પંડિતનામમાત્રાત્,
શાસ્ત્રેષ્વધીતી જનરંજકેષુ।
તત્કિંચનાધીષ્વ કુરુષ્વ ચાશુ,
ન તે ભવેદ્યેન ભવાબ્ધિપાતઃ ॥૫॥
ધિગાગમૈર્માદ્યસિ રંજયન્ જનાન્,
નોદ્યચ્છસિ પ્રેત્યહિતાય સંયમે।
દધાસિ કુક્ષિંભરિમાત્રતાં મુને,
ક્વ તે ક્વ તત્ ક્વૈષ ચ તે ભવાંતરે ॥૬॥
ધન્યાઃ કેઽપ્યનધીતિનોઽપિ સદનુષ્ઠાનેષુ બદ્ધાદરા,

દુઃસાધ્યેષુ પરોપદેશલવતઃ શ્રદ્ધાનશુદ્ધાશયાઃ।
કેચિત્ત્વાગમપાઠિનોઽપિ દધતસ્તત્પુસ્તકાન્ યેઽલસાઃ અત્રામુત્રહિતેષુ કર્મસુ કથં તે ભાવિન પ્રેત્યહાઃ ॥૭॥
ધન્યઃ સ મુગ્ધમતિરપ્યુદિતાર્હદાજ્ઞારાગેણ-
યઃ સૃજતિ પુણ્યમદુર્વિકલ્પઃ।
પાઠેન કિં વ્યસનતોઽસ્ય તુ દુર્વિકલ્પૈર્યો,
દુઃસ્થિતોઽત્ર સદનુષ્ઠિતિષુ પ્રમાદી ॥૮॥
અધીતિમાત્રેણ ફલંતિ નાગમાઃ,
સમીહિતૈર્જીવ સુખૈર્ભવાન્તરે।
સ્વનુષ્ઠતૈઃ કિંતુ તદીરિતૈઃ ખરો,
ન યત્સિતાયા વહનશ્રમાત્સુખી ॥૯॥
દુર્ગંધતો યદણુતોઽપિ પુરસ્ય મૃત્યુરાયૂંષિ સાગરમિતાન્યનુપક્રમાણિ।
સ્પર્શઃ ખરઃ ક્રકચતોઽતિતમામિતશ્ચ,
દુઃખાવનંતગુણિતૌ ભૃશશૈત્યતાપૌ ॥૧૦॥
તીવ્રા વ્યથાઃ સુરકૃતા વિવિધાશ્ચ,
યત્રાક્રંદારવૈઃ સતતમભ્રભૃતોઽપ્યમુષ્માત્।
કિં ભાવિનો ન નરકાત્કુમતે બિભેષિ,
યન્મોદસે ક્ષણસુખૈર્વિષયૈઃ કષાયી ॥૧૧॥ યુગ્મમ્।
બંધોઽનિશં વાહનતાડનાનિ,
ક્ષુત્તૃડ્દુરામાતપશીતવાતાઃ।
નિજાન્યજાતીયભયાપમૃત્યુદુઃખાનિ,
તિર્યક્ષ્વિતિ દુસ્સહાનિ ॥૧૨॥
મુધાન્યદાસ્યાભિભવાભ્યસૂયા ભિયોઽન્તગર્ભસ્થિતિદુર્ગતીનામ્।
એવં સુરેષ્વપ્યસુખાનિ નિત્યં,
કિં તત્સુખૈર્વા પરિણામદુઃખૈઃ ॥૧૩॥
સપ્તભીત્યભીભવેષ્ટવિપ્લવા-
નિષ્ટયોગગદદુઃસુતાદિભિઃ।
સ્યાચ્ચિરં વિરસતા નૃજન્મનઃ,
પુણ્યતઃ સરસતાં તદાનય ॥૧૪॥
ઇતિ ચતુર્ગતિદુઃખતતીઃ,
કૃતિન્નતિભયાસ્ત્વમનંતમનેહસમ્।
હૃદિ વિભાવ્ય જિનોક્તકૃતાંતતઃ,
કરુ તથા ન યથા સ્યુરિમાસ્તવ ॥૧૫॥
આત્મન્ પરસ્ત્વમસિ સાહસિકઃ,
શ્રુતાક્ષૈર્યદ્ભાવિનં ચિરચતુર્ગતિદુઃખરાશિમ્।
પશ્યન્નપીહ ન બિભેષિ તતો ન તસ્ય,
વિચ્છિત્તયે ચ યતસે વિપરીતકારી ॥૧૬॥

## અથ નવમશ્ચિત્તદમનાધિકારઃ

કુકર્મજાલૈઃ કુવિકલ્પસૂત્રજૈર્નિબધ્ય,
ગાઢં નરકાગ્નિભિશ્ચિરમ્।
વિસારવત્ પક્ષ્યતિ જીવ!
હે મનઃકૈવર્તકસ્ત્વામિતિ માસ્ય વિશ્વસીઃ ॥૧॥
ચેતોઽર્થયે મયિ ચિરત્નસખે! પ્રસીદ,
કિં દુર્વિકલ્પનિકરૈઃ ક્ષિપસે ભવે મામ્।

બદ્ધોઽજલિઃ કુરુ કૃપાં ભજ સદ્વિકલ્પાન્,
મૈત્રીં કૃતાર્થય યતો નરકાદ્બિભેમિ ॥૨॥
સ્વર્ગાપવર્ગૌ નરકં તથાન્તર્મુહૂર્ત-
માત્રેણ વશાવશં યત્।
દદાતિ જન્તોઃ સતતં પ્રયત્નાત્,
વશં તદંતઃકરણં કુરુષ્વ ॥૩॥
સુખાય દુઃખાય ચ નૈવ દેવા,
ન ચાપિ કાલઃ સુહૃદોઽરયો વા।
ભવેત્પરં માનસમેવ જંતોઃ,
સંસારચક્રભ્રમણૈકહેતુઃ ॥૪॥
વશં મનો યસ્ય સમાહિતં સ્યાત્,
કિં તસ્ય કાર્યં નિયમૈર્યમૈશ્ચ?।
હતં મનો યસ્ય ચ દુર્વિકલ્પૈઃ,
કિં તસ્ય કાર્યં નિયમૈર્યમૈશ્ચ? ॥૫॥
દાનશ્રુતધ્યાનતપોઽર્ચનાદિ,
વૃથા મનોનિગ્રહમંતરેણ।
કષાયચિંતાકુલતોજ્ઝિતસ્ય,
પરો હિ યોગો મનસો વશત્વમ્ ॥૬॥
જપો ન મુક્ત્યૈ ન તપો દ્વિભેદં,
ન સંયમો નાપિ દમો ન મૌનમ્।
ન સાધનાદ્યં પવનાદિકસ્ય,
કિંત્વેકમંતઃકરણં સુદાન્તમ્ ॥૭॥
લબ્ધ્વાપિ ધર્મં સકલં જિનોદિતં,
સુદુર્લભં પોતનિભં વિહાય ચ।
મનઃપિશાચગ્રહિલીકૃતઃ પતન્,
ભવાંબુધૌ નાયતિદૃગ્ જડો જનઃ ॥૮॥
સુદુર્જયં હી રિપવત્યદો મનો,
રિપૂકરોત્યેવ ચ વાક્તનૂ અપિ।
ત્રિભિર્હતસ્તદ્રિપુભિઃ કરોતુ કિં,
પદીભવન્ દુર્વિપદાં પદે પદે ॥૯॥
રે ચિત્ત! વૈરિ! તવ કિં નુ મયાપરાદ્ધં,
યદ્દુર્ગતૌ ક્ષિપસિ માં કુવિકલ્પજાલૈઃ।
જાનાસિ મામયમપાસ્ય શિવેઽસ્તિ,
ગંતા તત્કિં ન સન્તિ તવ વાસપદં હ્યસંખ્યાઃ ॥૧૦॥
પૂતિશ્રુતિઃ શ્વેવ રતેર્વિદૂરે,
કુષ્ટીવ સંપત્સુદૃશામનર્હઃ।
શ્વપાકવત્સદ્ગતિમંદિરેષુ,
નાર્હેત્પ્રવેશં કુમનોહતોઽઙ્ગી ॥૧૧॥
તપોજપાદ્યાઃ સ્ફલાય ધર્મા,
ન દુર્વિકલ્પૈર્હતચેતસઃ સ્યુઃ।
તત્ખાદ્યપેયૈઃ સુભૃતેઽપિ ગેહે,
ક્ષુધાતૃષાભ્યાં મ્રિયતે સ્વદોષાત્ ॥૧૨॥
અકૃચ્છ્રસાધ્યં મનસો વશીકૃતાન્,

પરં ચ પુણ્યં, ન તુ યસ્ય તદ્વશમ્।
સ વંચિતઃ પુણ્યચયૈસ્તદુદ્ભવૈઃ,
ફલૈશ્ચ હી! હી! હતકઃ કરોતુ કિમ્? ॥૧૩॥
અકારણં યસ્ય ચ દુર્વિકલ્પૈર્હતં,
મનઃશાસ્ત્રવિદોઽપિ નિત્યમ્।
ઘોરૈરઘૈર્નિશ્ચિત નારકાયુર્મૃત્યૌ,
પ્રયાતા નરકે સ નૂનમ્ ॥૧૪॥
યોગસ્ય હેતુર્મનસઃ સમાધિઃ,
પરં નિદાનં તપસશ્ચ યોગઃ।
તપશ્ચ મૂલં શિવશર્મવલ્યા,
મનઃસમાધિં ભજ તત્કથંચિત્ ॥૧૫॥
સ્વાધ્યાયયોગૈશ્ચરણક્રિયાસુ,
વ્યાપારણૈર્દ્વાદશભાવનાભિઃ।
સુધીસ્ત્રિયોગીસદસત્પ્રવૃત્તિ-
ફલોપયોગૈશ્ચ મનો નિરુંધ્યાત્ ॥૧૬॥
ભાવનાપરિણામેષુ, સિંહેષ્વિવ મનોવને।
સદા જાગ્રત્સુ દુર્ધ્યાનસૂકરા ન વિશંત્યપિ ॥૧૭॥

## અથ દશમો વૈરાગ્યોપદેશાધિકારઃ

કિં જીવ માદ્યસિ હસસ્યયમીહસેઽર્થાન્,
કામાંશ્ચ ખેલસિ તથા કુતુકૈરશંકઃ।
ચિક્ષિપ્સુ ઘોરનરકાવટકોટરે,
ત્વામભ્યપતલ્લઘુ વિભાવય મૃત્યુરક્ષઃ ॥૧॥
આલંબનં તવ લવાદિકુઠારઘાતાઃ,
છિંદંતિ જીવિતતરું ન હિ યાવદાત્મન્।
તાવદ્યતસ્વ પરિણામહિતાય તસ્મિન્,
છિન્ને હિ કઃ ક્વ ચ કથં ભવિતા સ્વતંત્રઃ ॥૨॥
ત્વમેવ મોગ્ધા મતિમાન્ ત્વમાત્મન્,
નેષ્ટાપ્યનેષ્ટા સુખદુઃખયોસ્ત્વમ્।
દાતા ચ ભોક્તા ચ તયોસ્ત્વમેવ,
તચ્ચેષ્ટસે કિં? ન યથા હિતાપ્તિઃ ॥૩॥
કસ્તે નિરંજન! ચિરં જનરંજનેન,
ધીમન્! ગુણોઽસ્તિ પરમાર્થદશેતિ પશ્ય।
તં રંજયાશુ વિશદૈશ્ચરિતૈર્ભવાબ્ધૌ,
યસ્ત્વાં પંતતમબલં પરિપાતુમીષ્ટે ॥૪॥
વિદ્વાનહં સકલલબ્ધિરહં નૃપોઽહં,
દાતાહમદ્ભુતગુણોઽહમહં ગરીયાન્।
ઇત્યાદ્યહંકૃતિવશાત્પરિતોષમેષિ,
નો વેત્સિ કિં પરભવે લઘુતાં ભવિત્રીમ્ ॥૫॥
વેત્સિ સ્વરૂપફલસાધનબાધનાનિ,
ધર્મસ્ય, તં પ્રભવસિ સ્વવશશ્ચ કર્તુમ્।
તસ્મિન્ યતસ્વ મતિમન્નધુનેત્યમુત્ર,
કિંચિત્ત્વયા હિ નહિ સેત્સ્યતિ ભોત્સ્યતે વા ॥૬॥

ધર્મસ્યાऽવસરોऽસ્તિ પુદ્ગલપરાવર્તૈરનંતૈસ્તવાऽऽયાતઃ સંપ્રતિ જીવ હે પ્રસહતો દુઃખાન્યનંતાન્યયમ્।
સ્વલ્પાહઃ પુનરેષ દુર્લભતમશ્ચાસ્મિન્ યતસ્વાર્હતો, ધર્મં કતુમિમં વિના હિ નહિ તે દુઃખક્ષયઃ કર્હિચિત્
॥૭॥
ગુણસ્તુતીર્વાંછસિ નિર્ગુણોऽપિ,
સુખપ્રતિષ્ઠાદિ વિનાપિ પુણ્યમ્।
અષ્ટાંગયોગં ચ વિનાપિ સિદ્ધીર્વાતૂલતા,
કાપિ નવા તવાત્મન્ ॥૮॥
પદે પદે જીવ! પરાભિભૂતિઃ,
પશ્યન્ કિમીર્ષ્યસ્યધમઃ પરેભ્યઃ।
અપુણ્યમાત્માનમવૈષિ કિં ન,
તનોષિ કિં વા નહિ પુણ્યમેવ ॥૯॥
કિમર્દયન્નિર્દયમંગિનો લઘૂન્,
વિચેષ્ટસે કર્મસુ હી પ્રમાદતઃ।
યદેકશોऽપ્યન્યકૃતાર્દનઃ,
સહત્યનંતશોऽપ્યંગ્યયમર્દનં ભવે ॥૧૦॥
યથા સર્પમુખસ્થોऽપિ, ભેકો જંતૂનિ ભક્ષયેત્।
તથા મૃત્યુમુખસ્થોऽપિ, કિમાત્મન્નર્દસેંऽગિનઃ ॥૧૧॥
આત્માનમલ્પૈરિહ વંચયિત્વા,
પ્રકલ્પિતૈર્વા તનુચિત્તસૌખ્યૈઃ।
ભવાધમે કિં જન! સાગરાણિ,
સોઢાસિ હી નારકદુઃખરાશીન ॥૧૨॥
ઉરભ્રકાકિણ્યુદબિંદુકામ્રવણિક્ત્રયીશાકટભિક્ષુકાદ્યૈઃ।
નિદર્શનૈર્હારિતમર્ત્યજન્મા, દુઃખી પ્રમાદૈર્બહુ શોચિતાસિ ॥૧૩॥
પતંગભૃંગૈણખગાહિમીનદ્વિપ-
દ્વિપારિપ્રમુખાઃ પ્રમાદૈઃ।
શોચ્યા યથા સ્યુર્મૃતિબંધદુઃખૈશ્ચિરાય,
ભાવી ત્વમપીતિ જંતો! ॥૧૪॥
પુરાપિ પાપૈઃ પતિતોऽસિ દુઃખરાશૌ,
પુનર્મૂઢ! કરોષિ તાની।
મજ્જન્મહાપંકિલવારિપૂરે,
શિલા નિજે મૂર્ધ્નિ ગલે ચ ધત્સે ॥૧૫॥
પુનઃ પુનર્જીવ! તવોપદિશ્યતે,
બિભેષિ દુઃખાત્સુખમીહસે ચેત્।
કુરુષ્વ તત્કિંચન યેન વાંછિતં,
ભવેત્તવાસ્તેऽવસરોऽયમેવ યત્ ॥૧૬॥
ધનાંગસૌખ્યસ્વજનાનસૂનપિ,
ત્યજ ત્યજૈક ન ચ ધર્મમાર્હતમ્।
ભવન્તિ ધર્માદ્ધિ ભવે ભવેऽર્થિતાન્ય-
મૂન્યમીભિઃ પુનરેષ દુર્લભઃ ॥૧૭॥
દુઃખં યથા બહુવિધં સહસેऽપ્યકામઃ,
કામં તથા સહસિ ચેત્કરુણાદિભાવૈઃ।
અલ્પીયસાપિ તવ તેન ભવાંતરે,
સ્યાદાત્યંતિકી સકલદુઃખનિવૃત્તિરેવ ॥૧૮॥
પ્રગલ્ભસે કર્મસુ પાપકેષ્વરે,
યદાશયા શર્મ ન તદ્વિનાનિતમ્।
વિભાવયંસ્તચ્ચ વિનશ્વરં દ્રુતં,

બિભેષિ કિં દુર્ગતિદુઃખતો નહિ? ॥૧૯॥
કર્માણિ રે જીવ! કરોષિ તાનિ,
યૈસ્તે ભવિત્ર્યો વિપદો હ્યનંતાઃ।
તાભ્યો ભિયા તદ્દધસેઽધુના કિં?,
સંભાવિતાભ્યોઽપિ ભૃશાકુલત્વમ્ ॥૨૦॥
યે પાલિતા વૃદ્ધિમતાઃ સહૈવ,
સ્નિગ્ધા ભૃશં સ્નેહપદં ચ યે તે।
યમેન તાનપ્યદયં ગૃહીતાન્,
જ્ઞાત્વાપિ કિં ન ત્વરસે હિતાય? ॥૨૧॥
યૈઃ ક્લિશ્યસે ત્વં ધનબંધ્વપત્યયશઃ-
પ્રભુત્વાદિભિરાશયસ્થૈઃ।
કિયાનિહ પ્રેત્ય ચ તૈર્ગુણસ્તે,
સાધ્યઃ કિમાયુશ્ચ વિચારયૈવમ્ ॥૨૨॥
કિમુ મુહ્યસિ ગત્વરૈઃ પૃથક્, કૃપણૈર્બધુવપુઃપરિગ્રહૈઃ।
વિમૃશસ્વ હિતોપયોગિનોઽવસરેઽસ્મિન્ પરલોકપાંથ! રે ॥૨૩॥
સુખમાસ્સે સુખં શેષે, ભુંક્ષે પિબસિ ખેલસિ।
ન જાને ત્વગ્રતઃ પુણ્યૈર્વિના તે કિં ભવિષ્યતિ? ॥૨૪॥
શીતાત્તાપાન્મક્ષિકાકત્તૃણાદિસ્પર્શા-દ્યુત્થાત્કષ્ટતોઽલ્પાદ્બિભેષિ।
તાસ્તાશ્ચૈભિઃ કર્મભિઃ સ્વીકરોષિ,
શ્વભ્રાદીનાં વેદના ધિગ્ ધિયં તે ॥૨૫॥
ક્વચિત્કષાયૈઃ ક્વચન પ્રમાદૈઃ,
કદાગ્રહૈઃ ક્વાપિ ચ મત્સરાદ્યૈઃ।
આત્માનમાત્મન્ કલુષીકરોષિ,
બિભેષિ ધિક્ નો નરકાદધર્મા ॥૨૬॥

## અથૈકાદશો ધર્મશુદ્ધ્યુપદેશાધિકારઃ

ભવેદ્ભવાપાયવિનાશનાય યઃ,
તમજ્ઞ! ધર્મં કલુષીકરોષિ કિમ્?।
પ્રમાદમાનોપધિમત્સરાદિભિર્ન,
મિશ્રિતં હ્યૌષધમામયાપહમ્ ॥૧॥
શૈથિલ્યમાત્સર્યકદાગ્રહક્રુધોઽનુતાપ-
દંભાવિધિગૌરવાણિ ચ।
પ્રમાદમાનૌ કુગુરુઃ કુસંગતિઃ,
શ્લાઘાર્થિતા વા સુકૃતે મલા ઇમે ॥૨॥
યથા તવેષ્ટા સ્વગુણપ્રશંસા,
તથા પરેષામિતિ મત્સરોજ્ઝી।
તેષામિમાં સંતનુ યલ્લભેથાસ્તાં,
નેષ્ટદાનાદિ(દ્ધિ?) વિનેષ્ટલાભઃ ॥૩॥
જનેષુ ગૃહ્ણત્સુ ગુણાન્ પ્રમોદસે,
તતો ભવિત્રી ગુણરિક્તતા તવ।
ગૃહણત્સુ દોષાન્ પરિતપ્યસે ચ ચેદ્,
ભવન્તુ દોષાસ્ત્વયિ સુસ્થિરાસ્તતઃ ॥૪॥
પ્રમોદસે સ્વસ્ય યથાન્યનિમિતૈઃ,
સ્તવૈસ્તથા ચેત્પ્રતિપંથિનામપિ।
વિગર્હણૈઃ સ્વસ્ય યથોપતપ્યસે,
તથા રિપૂણામપિ ચેત્તતોઽસિ વિત્ ॥૫॥
સ્તવૈર્યથા સ્વસ્ય વિગર્હણૈશ્ચ,

પ્રમોદતાપૌ ભજસે તથા ચેત્।
ઇમૌ પરેષામપિ તૈશ્ચતુર્ષ્વપ્યુદાસતાં,
વાસિ તતોઽર્થવેદી ॥૬॥
ભવેન્ન કોઽપિ સ્તુતિમાત્રતો ગુણી,
ખ્યાત્યા ન બહ્વ્યાપિ હિતં પરત્ર ચ।
તદિચ્છુરીર્ષ્યાદિભિરાયતિં તતો,
મુધાભિમાનગ્રહિલો નિહંસિ કિમ્ ॥૭॥
સૃજન્તિ કે કે ન બહિર્મુખા જનાઃ પ્રમાદમાત્સર્યકુબોધવિપ્લુતાઃ।
દાનાદિધર્માણિ મલીમસાન્યમૂન્યુપેક્ષ્ય,
શુદ્ધં સુકૃતં ચરાઽણવપિ ॥૮॥
આચ્છાદિતાનિ સુકૃતાનિ યથા દધંતે,
સૌભાગ્યમત્ર ન તથા પ્રકટીકૃતાનિ।
વ્રીડાનતાનનસરોજસરોજનેત્રા-
વક્ષઃસ્થલાનિ કલિતાનિ યથા દુકૂલૈઃ ॥૯॥
સ્તુતૈઃ શ્રુતૈર્વાપ્યપરૈર્નિરીક્ષિતૈર્ગુણ-
સ્તવાત્મન્! સુકૃતૈર્ન કશ્ચન।
ફલન્તિ નૈવ પ્રકટીકૃતૈર્ભુવો,
દ્રુમા હિ મૂલૈર્નિપતંત્યપિ ત્વધઃ ॥૧૦॥
તપઃક્રિયાવશ્યકદાનપૂજનૈઃ,
શિવં ન ગંતા ગુણમત્સરી જનઃ।
અપથ્યભોજી ન નિરામયો,
ભવેદ્રસાયનૈરપ્યતુલૈર્યદાતુરઃ ॥૧૧॥
મન્ત્રપ્રભારત્નરસાયનાદિનિ-
દર્શનાદલ્પમપીહ શુદ્ધમ્।
દાનાર્ચનાવશ્યકપૌષધાદિ,
મહાફલં પુણ્યમિતોઽન્યથાન્યત્ ॥૧૨॥
દીપો યથાલ્પોઽપિ તમાંસિ હન્તિ,
લવોઽપિ રોગાન્ હરતે સુધાયાઃ।
તૃણ્યાં દહત્યાશુ કણોઽપિ ચાગ્ને-
ર્ધર્મસ્ય લેશોઽપ્યમલસ્તર્થાંહઃ ॥૧૩॥
ભાવોપયોગશૂન્યાઃ, કુર્વન્નાવશ્યકીઃ,
ક્રિયાઃ સર્વાઃ દેહક્લેશં લભસે,
ફલમાપ્સ્યસિ નૈવ પુનરાસામ્ ॥૧૪॥

## અથ દ્વાદશો દેવગુરુધર્મશુદ્ધ્યધિકારઃ

તત્ત્વેષુ સર્વેષુ ગુરુઃ પ્રધાનં, હિતાર્થધર્મા હિ તદુક્તિસાધ્યાઃ।
શ્રયંસ્તમેવેત્યપરીક્ષ્ય મૂઢ!, ધર્મપ્રયાસાન્ કુરુષે વૃથૈવ ॥૧॥
ભવી ન ધર્મૈરવિધિપ્રયુક્તૈર્ગમી,
શીવં યેષુ ગુરુર્ન શુદ્ધઃ।
રોગી હિ કલ્યો ન રસાયનૈસ્તૈર્યેષા
પ્રયોક્તા ભિષગેવ મૂઢઃ ॥૨॥
સમાશ્રિતસ્તારકબુદ્ધિતો યો,
યસ્યાસ્ત્યહો મજ્જયિતા સ એવ।
ઓઘં તરીતા વિષમં કથં સ,
તથૈવ જંતુઃ કુગુરોર્ભવાબ્ધિમ્ ॥૩॥
ગજાશ્વપોતોક્ષરથાન્ યથેષ્ટપદાપ્તયે ભદ્ર!
નિજાન્ પરાન્ વા।

ભજંતિ વિજ્ઞાઃ સુગુણાન્ ભજૈવં,
શિવાય શુદ્ધાન્ ગુરુદેવધર્માન્ ॥૪॥
ફલાદ્ વૃથા સ્યુઃ કુગુરુપદેશતઃ,
કૃતા હિ ધર્માર્થમપીહ સૂદ્યમાઃ।
તદ્દૃષ્ટિરાગં પરિમુચ્ય ભદ્ર! હે,
ગુરું વિશુદ્ધં ભજ ચેદ્ધિતાર્થ્યસિ ॥૫॥
ન્યસ્તા મુક્તિપથસ્ય વાહકતયાશ્રીવીર! યે પ્રાક્ ત્વયા,
લુંટાકાસ્ત્વદૃતેઽભવન્ બહુતરાસ્ત્વચ્છાસને તે કલૌ।
બિભ્રાણા યતિનામ તત્તનુધિયાં મુષ્ણંતિ પુણ્યશ્રિયઃ,
પૂત્કુર્મઃ કિમરાજ્યકે હ્યપિ તલારક્ષા ન કિ દસ્યવઃ? ॥૬॥
માદ્યસ્યશુદ્ધૈર્ગુરુદેવધર્મૈર્ધિગ્-
દૃષ્ટિરાગેણ ગુણાનપેક્ષઃ।
અમુત્ર શોચિષ્યસિ તત્ફલે તુ,
કુપથ્યભોજીવ મહામયાર્ત્તઃ ॥૭॥
નામ્રં સુસિક્તોઽપિ દદાતિ નિંબકઃ,
પુષ્ટા રસૈર્વંધ્યગવી પયો ન ચ।
દુઃસ્થો નૃપો નૈવ સુસેવિતઃ શ્રિયં,
ધર્મં શિવં વા કુગુરુર્ન સંશ્રિતઃ ॥૮॥
કુલં ન જાતિઃ પિતરૌ ગણો વા,
વિદ્યા ચ બંધુઃ સ્વગુરુર્ધનં વા।
હિતાય જંતોર્ન પરં ચ કિંચિત્,
કિંત્વાદૃતાઃ સદ્ગુરુદેવધર્માઃ ॥૯॥
માતા પિતા સ્વઃ સુગુરુશ્ચ તત્ત્વાત્,
પ્રબોધ્ય યો યોજતિ શુદ્ધધર્મે।
ન તત્સમોઽરિઃ ક્ષિપતે ભવાબ્ધૌ,
યો ધર્મવિઘ્નાદિકૃતેશ્ચ જીવમ્ ॥૧૦॥
દાક્ષિણ્યલજ્જે ગુરુદેવપૂજા,
પિત્રાદિભક્તિઃ સુકૃતાભિલાષઃ।
પરોપકારવ્યવહારશુદ્ધી,
નૃણામિહામુત્ર ચ સંપદે સ્યુઃ ॥૧૧॥
જિનેષ્વભક્તિર્યતિનામવજ્ઞા,
કર્મસ્વનૌચિત્યમધર્મસંગઃ।
પિત્રાદ્યુપેક્ષા પરવંચનઞ્ચ,
સૃજન્તિ પુંસાં વિપદઃ સમન્તાત્ ॥૧૨॥
ભક્ત્યૈવ નાર્ચસિ જિનં સુગુરોશ્ચ ધર્મં,
નાકર્ણયસ્યવિરતં વિરતીર્ન ધત્સે।
સાર્થં નિરર્થમપિ ચ પ્રચિનોષ્યઘાનિ,
મૂલ્યેન કેન તદમુત્ર સમીહસે શમ્? ॥૧૩॥
ચતુષ્પદૈઃ સિંહ ઇવ સ્વજાત્યૈર્મિલન્નિમાં-
સ્તારયતીહ કશ્ચિત્।
સહૈવ તૈર્મજ્જતિ કોઽપિ દુર્ગે,
શૃગાલવચ્ચેત્યમિલન્ વરં સઃ ॥૧૪॥
પૂર્ણે તટાકે તૃષિતઃ સદૈવ,
ભૃતેઽપિ ગેહે ક્ષુધિતઃ સ મૂઢઃ।
કલ્પદ્રુમે સત્યપિ હી દરિદ્રો,
ગુર્વાદિયોગેઽપિ હિ યઃ પ્રમાદી ॥૧૫॥

ન ધર્મચિંતા ગુરુદેવભક્તિર્યેષાં,
ન વૈરાગ્યલવોઽપિ ચિત્તે।
તેષાં પ્રસૂક્લેશફલઃ પશૂનામિ-
વોદ્ભવઃ સ્યાદુદરંભરીણામ્ ॥૧૬॥
ન દેવકાર્યે ન ચ સંઘકાર્યે,
યેષાં ધનં નશ્વરમાશુ તેષામ્।
તદર્જનાદ્યૈર્વૃજિનૈર્ભવાંધૌ,
પતિષ્યતાં કિં ત્વવલંબનં સ્યાત્? ॥૧૭॥

## અથ ત્રયોદશો યતિશિક્ષોપદેશાધિકારઃ

તે તીર્ણા ભવવારિધિં મુનિવરાસ્તેભ્યો નમસ્કુર્મહે,
યેષાં નો વિષયેષુ ગૃધ્યતિ મનો નો વા કષાયૈઃ પ્લુતમ્।
રાગદ્વેષવિમુક્ પ્રશાંતકલુષં સામ્યાપ્તશર્માદ્વયં,
નિત્યં ખેલતિ ચાત્મસંયમગુણાક્રીડે ભજદ્ભાવનાઃ ॥૧॥
સ્વાધ્યાયમાધિત્સસિ નો પ્રમાદૈઃ,
શુદ્ધા ન ગુપ્તીઃ સમિતીશ્ચ ધત્સે।
તપો દ્વિધા નાર્જસિ દેહમોહાદલ્પેઽપિ,
હેતૌ દધસે કષાયાન્ ॥૨॥
પરીષહાન્નો સહસે ન ચોપસર્ગાન્ન,
શીલાંગધરોઽપિ ચાસિ।
તન્મોક્ષ્યમાણોઽપિ ભવાબ્ધિપારં,
મુને! કથં યાસ્યસિ વેષમાત્રાત્ ॥૩॥ યુગ્મમ્।
આજીવિકાર્થમિહ યદ્યતિવેષમેષ,
ધત્સે ચરિત્રમમલં ન તુ કષ્ટભીરુઃ।
તદ્વેત્સિ કિન્ન? ન બિભેતિ જગજ્જિઘૃક્ષુર્મૃત્યુઃ,
કુતોઽપિ નરકશ્ચ ન વેષમામાત્રાત્ ॥૪॥
વેષેણ માદ્યસિ યતેશ્ચરણં વિનાત્મન્!
પૂજાં ચ વાંછસિ જનાદ્બહુધોપધિં ચ।
મુગ્ધપ્રતારણભવે નરકેઽસિ ગંતા,
ન્યાયં બિભર્ષિ તદજાગલકર્તરીયમ્ ॥૫॥
જાનેઽસ્તિ સંયમતપોભિરમીભિરાત્મન્નસ્ય,
પ્રતિગ્રહભરસ્ય ન નિષ્ક્રયોઽપિ।
કિં દુર્ગતૌ નિપતતઃ શરણં તવાસ્તે?,
સૌખ્યં ચ દાસ્યતિ પરત્ર કિમિત્યવેહિ ॥૬॥
કિં લોકસત્કૃતિનમસ્કરણાર્ચનાદ્યૈ,
રે મુગ્ધ તુષ્યસિ વિનાપિ વિશુદ્ધયોગાન્।
કૃંતન્ ભવાંધુપતને તવ યત્પ્રમાદો,
બોધિદ્રુમાશ્રયમિમાનિ કરોતિ પર્શન્ ॥૭॥
ગુણાંસ્તવાશ્રિત્ય નમંત્યમી જના, દદત્યુપધ્યાલયભૈક્ષ્યશિષ્યકાન્।
વિના ગુણાન્ વેષમૃષેર્બિભર્ષિ ચેત્,
તતષ્ઠકાનાં તવ ભાવિની ગતિઃ ॥૮॥
નાજીવિકાપ્રણયિનીતનયાદિચિન્તા,
નો રાજભીશ્ચ ભગવત્સમયં ચ વેત્સિ।

શુદ્ધે તથાપિ ચરણે યતસે ન ભિક્ષો?,
તત્તે પરિગ્રહભરો નરકાર્થમેવ ॥૯॥
શાસ્ત્રજ્ઞોઽપિ ધૃતવ્રતોઽપિ ગૃહિણીપુત્રાદિબંધોજ્ઝિતોઽપ્યંગી યદ્યતતે પ્રમાદવશગો ન પ્રેત્યસૌખ્યશ્રિયે।
તન્મોહદ્વિષતસ્ત્રિલોકજયિનઃ કાચિત્પરા દુષ્ટતા, બદ્ધાયુષ્કતયા સ વા નરપશુર્નૂનં ગમી દુર્ગતૌ
॥૧૦॥
ઉચ્ચારયસ્યનુદિનં ન કરોમિ સર્વં,
સાવદ્યમિત્યકૃદેતદથો કરોષિ।
નિત્યં મૃષોક્તિજિનવંચનભારિતાત્તત્,
સાવદ્યતો નરકમેવ વિભાવયે તે ॥૧૧॥
વેષોપદેશાદ્યુપધિપ્રતારિતા,
દદત્યભીષ્ટાનૃજવોઽધુના જનાઃ।
ભુંક્ષે ચ શેષે ચ સુખં વિચેષ્ટસે,
ભવાંતરે જ્ઞાસ્યસિ તત્ફલં પુનઃ ॥૧૨॥
આજીવિકાદિવિવિધાર્ત્તિભૃશાનિશાર્ત્તાઃ,
કૃચ્છ્રેણ કેઽપિ મહતૈવ સૃજન્તિ ધર્માન્।
તેભ્યોઽપિ નિર્દય! જિઘૃક્ષસિ સર્વમિષ્ટં,
નો સંયમે ચ યતસે ભવિતા કથં હી ॥૧૩॥
આરાધિતો વા ગુણવાન્ સ્વયં તરન્,
ભવાબ્ધિમસ્માનપિ તારયિષ્યતિ।
શ્રયન્તિ યે ત્વામિતિ ભૂરિભક્તિભિઃ,
ફલં તવૈષાં ચ કિમસ્તિ નિર્ગુણ! ॥૧૪॥
સ્વયં પ્રમાદૈર્નિપતન્ ભવાંબુધૌ,
કથં સ્વભક્તાનપિ તારયિષ્યસિ?।
પ્રતારયન્ સ્વાર્થમૃજૂન્ શિવાર્થિનઃ,
સ્વતોઽન્યતશ્ચૈવ વિલુપ્યસેંઽહસા ॥૧૫॥
ગૃહ્ણાસિ શય્યાહૃતિપુસ્તકોપધીન્,
સદા પરેભ્યસ્તપસસ્ત્વિયં સ્થિતિઃ।
તત્તે પ્રમાદાદ્ભરિતાત્પ્રતિગ્રહૈર્ઋ-
ણાર્ણમગ્નસ્ય પરત્ર કા ગતિઃ? ॥૧૬॥
ન કાપિ સિદ્ધિર્ન ચ તેઽતિશાયિ,
મુને! ક્રિયાયોગતપઃશ્રુતાદિ।
તથાપ્યહંકારકદર્થિતસ્ત્વં,
ખ્યાતીચ્છયા તામ્યસિ ધિક્ મુધા કિમ્? ॥૧૭॥
હીનોઽપ્યરે ભાગ્યગુણૈર્મુધાત્મન્,
વાંછંસ્તવાર્ચાદ્યનવાપ્નુવંશ્ચ।
ઈર્ષ્યન્ પરેભ્યો લભસેઽતિતાપ-
મિહાપિ યાતા કુગતિ પરત્ર ॥૧૮॥
ગુણૈવિહીનોઽપિ જનાનતિસ્તુતિ-
પ્રતિગ્રહાન્ યન્મુદિતઃ પ્રતીચ્છસિ।
લુલાયગોઽશ્વોષ્ટ્રખરાદિજન્મભિર્વિના,
તતસ્તે ભવિતા ન નિષ્ક્રિયઃ ॥૧૯॥
ગુણેષુ નોદ્યચ્છસિ ચેન્મુને! તતઃ,
પ્રગીયસે યૈરપિ વંદ્યસેઽર્ચ્યસે।
જુગુપ્સિતાં પ્રેત્ય ગતિં ગતોઽપિ,
તૈર્હસિષ્યસે ચાભિભવિષ્યસેઽપિ વા ॥૨૦॥
દાનમાનનુતિવંદનાપરૈર્મોદસે,

નિકૃતિરંજિતૈર્જનૈઃ।
ન ત્વવૈષિ સુકૃતસ્ય ચેલ્લવઃ,
કોડપિ સોડપિ તવ લુટ્યતે હિ તૈઃ ॥૨૧॥
ભવેદ્ ગુણી મુગ્ધકૃતૈર્ન હિ સ્તવૈર્ન ખ્યાતિદાનાર્ચનવંદનાદિભિઃ।
વિના ગુણાન્નૌ ભવદુઃખસંક્ષયસ્તતો,
ગુણાનર્જય કિં સ્તવાદિભિઃ ॥૨૨॥
અધ્યેપિ શાસ્ત્રં સદસદ્વિચિત્રાલાપાદિ-
ભિસ્તામ્યસિ વા સમાયૈઃ।
યેષાં જનાનામિહ રંજનાય,
ભવાંતરે તે ક્વ મુને! ક્વ ચ ત્વમ્ ॥૨૩॥
પરિગ્રહં ચેદ્વ્યજહા ગૃહાદેસ્તત્કિં-
નુ ધર્મોપકૃતિચ્છલાત્તમ્।
કરોષિ શય્યોપધિપુસ્તકાદેર્ગરોડપિ,
નામાંતરતોડપિ હંતા ॥૨૪॥
પરિગ્રહાત્સ્વીકૃતધર્મસાધનાભિધાન-
માત્રાત્કિમુ મૂઢ! તુષ્યસિ।
ન વેત્સિ હેમ્નાપ્યતિભારિતા તરી,
નિમજ્જયત્યંગિનમંબુધૌ દ્રુતમ્ ॥૨૫॥
યેંડહઃકષાયકલિકર્મનિબંધભાજનં,
સ્યુઃ પુસ્તકાદિભિરપીહિતધર્મસાધનૈઃ।
તેષાં રસાયનવરૈરપિ સર્પદામયૈ-
રાર્ત્તાત્મનાં ગદહૃતેઃ સુખકૃત્તુ કિં ભવેત્ ॥૨૬॥
રક્ષાર્થં ખલુ સંયમસ્ય ગદિતા યેડર્થા યતીનાં જિનૈર્વાસઃપુસ્તકપાત્રકપ્રભૃતયો ધર્મોપકૃત્યાત્મકાઃ।
મૂર્છન્મોહવશાત્ત એવ કુધિયાં સંસારપાતાય ધિક્,
સ્વં સ્વસ્યૈવ વધાય શસ્ત્રમધિયાં યદુષ્પ્રયુક્તં ભવેત્ ॥૨૭॥
સંયમોપકરણચ્છલાત્પરાન્ભારયન્-
યદસિ પુસ્તકાદિભિઃ।
ગોખરોષ્ટ્રમહિષાદિરૂપભૃત્તચ્ચિરં,
ત્વમપિ ભારયિષ્યસે ॥૨૮॥
વસ્ત્રપાત્રતનુપુસ્તકાદિનઃ,
શોભયા ન ખલુ સંયમસ્ય સા।
આદિમા ચ દદતે ભવં પરા,
મુક્તમાશ્રય તદિચ્છયૈકિકામ્ ॥૨૯॥
શીતાતપાદ્યાન્ન મનાગપીહ,
પરીષહાંશ્ચેત્ક્ષમસે વિસોઢુમ્।
કથં તતો નારકગર્ભવાસદુઃખાનિ,
સોઢાસિ ભવાંતરે ત્વમે? ॥૩૦॥
મુને! ન કિં નશ્વરમસ્વદેહ-
મૃત્પિંડમેનં સુતપોવ્રતાદ્યૈઃ।
નિપીડ્ય ભીતિર્ભવદુઃખરાશેર્હિત્વાત્મ-
સાચ્છૈવસુખં કરોષિ? ॥૩૧॥
યદત્ર કષ્ટં ચરણસ્ય પાલને,
પરત્ર તિર્યઙ્નરકેષુ યત્પુનઃ।
તયોર્મિથઃ સપ્રતિપક્ષતા સ્થિતાવિશેષ-
દૃષ્ટ્યાન્યતરજ્જહીહિ તત્ ॥૩૨॥
શમત્ર યદ્બિન્દુરિવ પ્રમાદજં,

પરત્ર યચ્ચાબ્ધિરિવ દ્યુમુક્તિજમ્।
તયોર્મિથઃ સપ્રતિપક્ષતા સ્થિતા,
વિશેષદૃષ્ટ્યાન્યતરદ્ ગૃહાણ તત્ ।।૩૩।।
નિયંત્રણા યા ચરણેઽત્ર તિર્યક્સ્ત્રી-
ગર્ભકુંભીનરકેષુ યા ચ।
તયોર્મિથઃ સપ્રતિપક્ષભાવાદ્વિશેષ-
દૃષ્ટ્યાન્યતરાં ગૃહાણ ।।૩૪।।
સહ તપોયમસંયમયંત્રણાં,
સ્વવશતાસહને હિ ગુણો મહાન્।
પરવશસ્ત્વતિ ભૂરિ સહિષ્યસે,
ન ચ ગુણં બહુમાપ્સ્યસિ કંચન ।।૩૫।।
અણીયસા સામ્યનિયંત્રણાભુવા,
મુનેઽત્ર કષ્ટેન ચરિત્રજેન ચ।
યદિ ક્ષયો દુર્ગતિગર્ભવાસ-
ગાઽસુખાવલેસ્તત્કિમવાપિ નાર્થિતમ્? ।।૩૬।।
ત્યજ સ્પૃહાં સ્વઃશિવશર્મલાભે,
સ્વીકૃત્ય તિર્યઙ્નરકાદિદુઃખમ્।
સુખાણુભિશ્ચેદ્વિષયાદિજાતૈઃ,
સંતોષ્યસે સંયમકષ્ટભીરુઃ ।।૩૭।।
સમગ્રચિન્તાર્ત્તિહતેરિહાપિ,
યસ્મિન્સુખં સ્યાત્પરમં રતાનામ્।
પરત્ર ચેન્દ્રાદિમહોદયશ્રીઃ,
પ્રમાદ્યસીહાપિ કથં ચરિત્રે? ।।૩૮।।
મહાતપોધ્યાનપરીષહાદિ,
ન સત્ત્વસાધ્યં યદિ ધર્તુમીશઃ।
તદ્ભાવનાઃ કિં સમિતીશ્ચ ગુપ્તીર્ધત્સે,
શિવાર્થિન્ ન મનઃપ્રસાધ્યાઃ ।।૩૯।।
અનિત્યતાદ્યા ભજ ભાવનાઃ સદા,
યતસ્વ દુઃસાધ્યગુણેઽપિ સંયમે।
જિઘૃત્સયા તે ત્વરતે હ્યયં યમઃ,
(હ્યસંયમઃ?) શ્રયન્ પ્રમાદાન્ન ભવાદ્બિભેષિ કિમ્? ।।૪૦।।
હતં મનસ્તે કુવિકલ્પજાલૈ-
ર્વચોઽપ્યવદ્યૈશ્ચ વપુઃ પ્રમાદૈઃ।
લબ્ધીશ્ચ સિદ્ધીશ્ચ તથાપિ વાંછન્,
મનોરથૈરેવ હહા!! હતોઽસિ ।।૪૧।।
મનોવશસ્તે સુખદુઃખસંગમો,
મનો મિલેદ્યૈસ્તુ તદાત્મકં ભવેત્।
પ્રમાદચોરૈરિતિ વાર્યતાં,
મિલચ્છીલાંગમિત્રૈરનુષઞ્જયાનિશમ્ ।।૪૨।।
ધ્રુવઃ પ્રમાદૈર્ભવવારિધૌ મુને!,
તવ પ્રપાતઃ પરમત્સરઃ પુનઃ।
ગલે નિબદ્ધોરુશિલોપમોઽસ્તિચેત્ કથં તદોન્મજ્જનમપ્યવાપ્સ્યસિ? ।।૪૩।।
મહર્ષયઃ કેઽપિ સહંત્યુદીર્યાપ્યુગ્રાત-
પાદીન્યદિ નિર્જરાર્થમ્।
કષ્ટં પ્રસંગાગતમપ્યણીયોઽપીચ્છન્-
શિવં કિં સહસે ન ભિક્ષો! ।।૪૪।।

યો દાનમાનસ્તુતિવંદનાભિર્ન,
મોદતેઽન્યૈર્ન તુ દુર્મનાયતે।
અલાભલાભાદિપરીપહાન્ સહન્,
યતિઃ સ તત્ત્વાદપરો વિડંબકઃ ॥૪૫॥
દધદ્ ગૃહસ્થેષુ મમત્વબુદ્ધિં,
તદીયતપ્ત્યા પરિતપ્યમાનઃ।
અનિવૃતાંતઃકરણઃ સદા સ્વૈસ્તેષાં-
ચ પાપૈર્ભ્રમિતા ભવેઽસિ ॥૪૬॥
ત્યક્ત્વા ગૃહં સ્વં પરગેહચિંતા-
તપ્તસ્ય કો નામ ગુણસ્તવર્ષે!।
આજીવિકાસ્તે યતિવેષતોઽત્ર,
સુદુર્ગતિઃ પ્રેત્ય તુ દુર્નિવારા ॥૪૭॥
કુર્વે ન સાવદ્યમિતિ પ્રતિજ્ઞાં,
વદન્નકુર્વન્નપિ દેહમાત્રાત્।
શય્યાદિકૃત્યેષુ નુદન્ ગૃહસ્થાન્,
હૃદા ગિરા વાઽસિ કથં મુમુક્ષુઃ? ॥૪૮॥
કથં મહત્ત્વાય મમત્વતો વા,
સાવદ્યમિચ્છસ્યપિ સંઘલોકે।
ન હેમમય્યપ્યુદરે હિ શસ્ત્રી,
ક્ષિપ્તા ક્ષણોતિ ક્ષણતોઽપ્યસૂન્ કિમ્? ॥૪૯॥
રંકઃ કોઽપિ જનાભિભૂતિપદવીં ત્યક્ત્વા પ્રસાદાદ્દ્ગુરો-ર્વેષં પ્રાપ્ય યતઃ કથંચન કિયચ્છાસ્ત્રં પદં કોઽપિ ચ।
મૌખર્યાદિવશીકૃતર્જુજનતાદાનાર્ચનૈર્ગર્વભા-ગાત્માનં ગણયન્નરેંદ્રમિવ ધિગ્ ગંતા દ્રુતં દુર્ગતૌ ॥૫૦॥
પ્રાપ્યાપિ ચારિત્રમિદં દુરાપં,
સ્વદોષજૈર્યદ્વિષયપ્રમાદૈઃ।
ભવાંબુધૌ ધિક્ પતિતોઽસિ ભિક્ષો!,
હતોઽસિ દુઃખૈસ્તદનંતકાલમ્ ॥૫૧॥
કથમપિ સમવાપ્ય બોધિરત્નં,
યુગસમિલાદિનિદર્શનાદ્દુરાપમ્।
કુરુ કુરુ રિપુવશ્યતામગચ્છન્,
કિમપિ હિતં લભસે યતોઽર્થિતં શમ્ ॥૫૨॥
દ્વિષસ્ત્વિમે તે વિષયપ્રમાદા,
અસંવૃતા માનસદેહવાચઃ।
અસંયમાઃ સપ્તદશાપિ હાસ્યાદયશ્ચ,
બિભ્યચ્ચર નિત્યમેભ્યઃ ॥૫૩॥
ગુરૂનવાપ્યાપ્યપહાય ગેહમધીત્ય,
શાસ્ત્રાણ્યપિ તત્ત્વવાંચિ।
નિર્વાહચિંતાદિભરાદ્યભાવેઽપ્યૂષે!
ન કિં પ્રેત્યહિતાય યત્નઃ? ॥૫૪॥
વિરાધિતૈઃ સંયમસર્વયોગૈઃ,
પતિષ્યતસ્તે ભવદુઃખરાશૌ।
શાસ્ત્રાણિ શિષ્યોપધિપુસ્તકાદ્યા,
ભક્તાશ્ચ લોકા શરણાય નાલમ્ ॥૫૫॥
યસ્ય ક્ષણોઽપિ સુરધામસુખાનિ,
પલ્ય-કોટીર્નૃણાં દ્વિનવતીં હ્યધિકાં દદાતિ।
કિં હારયસ્યધમ્! સંયમજીવિતં તત્,
હા હા પ્રમત્ત! પુનરસ્ય કુતસ્તવાપ્તિઃ? ॥૫૬॥

નામ્નાપિ યસ્યેતિ જનેઽસિ પૂજ્યઃ,
શુદ્ધાત્તતો નેષ્ટસુખાનિ કાનિ।
તત્સંયમેઽસ્મિન્ યતસે મુમુક્ષોઽનુ-
ભૂયમાનોરુફલેઽપિ કિં ન? ॥૫૭॥

## અથ ચતુર્દશો મિથ્યાત્વાદિનિરોધાધિકારઃ

મિથ્યાત્વયોગાવિરતિપ્રમાદાન્,
આત્મન્! સદા સંવૃણુ સૌખ્યમિચ્છન્।
અસંવૃતા યદ્ભવતાપમેતે,
સુસંવૃતા મુક્તિરમાં ચ દદ્યુઃ ॥૧॥
મનઃ સંવૃણુ હે વિદ્વન્!, અસંવૃતમના યતઃ।
યાતિ તંદુલમત્સ્યો દ્રાક્, સપ્તમીં નરકાવનીમ્ ॥૨॥
પ્રસન્નચંદ્રરાજર્ષેર્મનઃપ્રસરસંવરૌ।
નરકસ્ય શિવસ્યાપિ, હેતુભૂતૌ ક્ષણાદપિ ॥૩॥
મનોઽપ્રવૃત્તિમાત્રેણ, ધ્યાનં નૈકેન્દ્રિયાદિષુ।
ધર્મ્યશુક્લમનઃસ્થૈર્યભાજસ્તુ ધ્યાયિનઃ સ્તુમઃ ॥૪॥
સાર્થં નિરર્થકં વા યન્-મનઃ સુધ્યાનયંત્રિતમ્।
વિરતં દુર્વિકલ્પેભ્યઃ, પારગાંસ્તાન્ સ્તુવે યતીન્ ॥૫॥
વચોઽપ્રવૃત્તિમાત્રેણ, મૌનં કે કે ન બિભ્રતિ।
નિરવદ્યં વચો યેષામ્, વચોગુપ્તાંસ્તુ તાન્ સ્તુવે ॥૬॥
નિરવદ્યં વચો બ્રૂહિ, સાવદ્યવચનૈર્યતઃ।
પ્રયાતા નરકં ઘોરં, વસુરાજાદયો દ્રુતમ્ ॥૭॥
ઇહાઽમુત્ર ચ વૈરાય, દુર્વાચો નરકાય ચ।
અગ્નિદગ્ધા પ્રરોહન્તિ, દુર્વાગ્દગ્ધાઃ પુનર્ન હિ ॥૮॥
અત એવ જિના દીક્ષાકાલાદકેવલોદ્ભવમ્।
અવદ્યાદિભિયા બ્રૂયુર્જ્ઞાનત્રયભૃતોઽપિ ન ॥૯॥
કૃપયા સંવૃણુ સ્વાંગં, કૂર્મજ્ઞાતનિદર્શનાત્।
સંવૃતાસંવૃતાંગા યત્, સુખદુઃખાન્યવાપ્નુયુઃ ॥૧૦॥
કાયસ્તંભાન્ન કે કે સ્યુસ્તરુસ્તંભાદયો યતાઃ।
શિવહેતુક્રિયો યેષાં, કાયસ્તાંસ્તુ સ્તુવે યતીન્ ॥૧૧॥
શ્રુતિસંયમમાત્રેણ, શબ્દાન્ કાન્ કે ત્યજન્તિ ના।
ઇષ્ટાનિષ્ટેષુ ચૈતેષુ, રાગદ્વેષૌ ત્યજન્મુનિઃ ॥૧૨॥
ચક્ષુઃસંયમમાત્રાત્ કે, રૂપાલોકાંસ્ત્યજન્તિ ના।
ઇષ્ટાનિષ્ટેષુ ચૈતેષુ, રાગદ્વેષૌ ત્યજન્મુનિઃ ॥૧૩॥
ઘ્રાણસંયમમાત્રેણ, ગંધાન્ કાન્ કે ત્યજન્તિ ના।
ઇષ્ટાનિષ્ટેષુ ચૈતેષુ, રાગદ્વેષૌ ત્યજન્ મુનિઃ ॥૧૪॥
જિહ્વાસંયમમાત્રેણ, રસાન્ કાન્ કે ત્યજન્તિ ના।
મનસા ત્યજ તાનિષ્ટાન્, યદીચ્છસિ તપઃફલમ્ ॥૧૫॥
ત્વચઃસંયમમાત્રેણ, સ્પર્શાન્ કાન્ કે ત્યજન્તિ ના।
મનસા ત્યજ તાનિષ્ટાન્ યદીચ્છસિ તપઃફલમ્ ॥૧૬॥
બસ્તિસંયમમાત્રેણ, બ્રહ્મ કે કે ન બિભ્રતે।
મનઃસંયમતો ધેહિ, ધીર! ચેત્તત્ફલાર્થ્યસિ ॥૧૭॥
વિષયેંદ્રિયસંયોગાભાવાત્કે કે ન સંયતાઃ।
રાગદ્વેષમનોયોગભાવાત્કે તુ સ્તવીમિ તાન્ ॥૧૮॥
કષાયાન્ સંવૃણુ પ્રાજ્ઞ, નરકં યદસંવરાત્।
મહાતપસ્વિનોઽપ્યાપુઃ, કરટોત્કરટાદયઃ ॥૧૯॥
યસ્યાસ્તિ કિંચિન્ન તપોયમાદિ,

બ્રૂયાત્સ યત્તત્તુદતાં પરાન્ વા।
યસ્યાસ્તિ કષ્ટાપ્તમિદં તુ કિં ન,
તદ્ભ્રંશભીઃ સંવૃણુતે સ યોગાન્ ॥૨૦॥
ભવેત્સમગ્રેષ્વપિ સંવરેષુ,
પરં નિદાનં શિવસંપદાં યઃ।
ત્યજન્ કષાયાદિજદુર્વિકલ્પાન્,
કુર્યાન્મનઃસંવરમિદ્ધધીસ્તમ્ ॥૨૧॥
તદેવમાત્મા કૃતસંવરઃ સ્યાત્,
નિઃસંગતાભાક્ સતતં સુખેન।
નિઃસંગભાવાદથ સંવરસ્તદ્દ્વયં,
શિવાર્થી યુગપદ્ભજેત ॥૨૨॥

## અથ પંચદશઃ શુભવૃત્તિશિક્ષોપદેશાધિકારઃ

આવશ્યકેષ્વાતનુ યત્નમાપ્તોદિતેષુ શુદ્ધેષુ તમોઽપહેષુ।
ન હંત્યભુક્તં હિ ન ચાપ્યશુદ્ધં,
વૈદ્યોક્તમપ્યૌષધમામયાન્ યત્ ॥૧॥
તપાંસિ તન્યાદ્દ્વિવિધાનિ નિત્યં,
મુખે કટૂન્યાયતિસુંદરાણિ।
નિઘ્નન્તિ તાન્યેવ કુકર્મરાશિં,
રસાયનાનીવદુરામયાન્ યત્ ॥૨॥
વિશુદ્ધશીલાંગસહસ્રધારી,
ભવાનિશં નિર્મિતયોગસિદ્ધિઃ।
સહોપસર્ગાસ્તનુનિર્મમઃ સન્,
ભજસ્વ ગુપ્તીઃ સમિતીશ્ચ સમ્યક્ ॥૩॥
સ્વાધ્યાયયોગેષુ દધસ્વ યત્નં,
મધ્યસ્થવૃત્ત્યાનુસરાગમાર્થાન્।
અગારવો ભૈક્ષમટાઽવિષાદો,
હેતૌ વિશુદ્ધે વશિતેંદ્રિયૌઘઃ ॥૪॥
દદસ્વ ધર્માર્થિતયૈવ ધર્મ્યાન્,
સદોપદેશાન્ સ્વપરાદિસામ્યાન્।
જગદ્ધિતૈષી નવભિશ્ચ કલ્પૈર્ગ્રામે,
કુલે વા વિહરાઽપ્રમત્તઃ ॥૫॥
કૃતાકૃતં સ્વસ્ય તપોજપાદિ,
શક્તીરશક્તીઃ સુકૃતેતરે ચ।
સદા સમીક્ષસ્વ હૃદાથ સાધ્યે,
યતસ્વ હેયં ત્યજ ચાવ્યયાર્થી ॥૬॥
પરસ્ય પીડાપરિવર્જનાત્તે, ત્રિધા ત્રિયોગ્યપ્યમલા સદાસ્તુ।
સામ્યૈકલીનં ગતદુર્વિકલ્પં, મનો વચશ્ચાપ્યનઘપ્રવૃત્તિ ॥૭॥
મૈત્રીં પ્રમોદં કરુણાં ચ સમ્યક્,
મધ્યસ્થતાં ચાનય સામ્યમાત્મન્।
સદ્ભાવનસ્વાત્મલયં પ્રયત્નાત્,
કૃતાવિરામં રમયસ્વ ચેતઃ! ॥૮॥
કુર્યાન્ન કુત્રાપિ મમત્વભાવં,
ન ચ પ્રભો! રત્યરતી કષાયાન્।
ઇહાપિ સૌખ્યં લભસેઽપ્યનીહો,
હ્યનુત્તરામર્ત્યસુખાભમાત્મન્! ॥૯॥
ઇતિ યતિવરશિક્ષાં યોઽવધાર્ય વ્રતસ્થ-શ્ચરણકરણયોગાનેકચિત્તઃ શ્રયેત।

સપદિ ભવમહાબ્ધિં ક્લેશરાશિં સ તીર્ત્વા,
વિલસતિ શિવસૌખ્યાનંત્યસાયુજ્યમાપ્ય ॥૧૦॥

## અથ ષોડશઃ સામ્યસર્વસ્વાધિકારઃ

એવં સદાભ્યોસવશેન સાત્મ્યં,
નયસ્વ સામ્યં પરમાર્થવેદિન્!।
યતઃ કરસ્થાઃ શિવસંપદસ્તે,
ભવન્તિ સદ્યો ભવભીતિભેત્તુઃ ॥૧॥
ત્વમેવ દુઃખં નરકસ્ત્વમેવ,
ત્વમેવ શર્માપિ શિવં ત્વમેવ।
ત્વમેવ કર્માણિ મનસ્ત્વમેવ,
જહીહ્યવિદ્યામવધેહિ ચાત્મન્! ॥૨॥
નિઃસંગતામેહિ સદા તદાત્મન્નર્થેષ્વ-
શેષેષ્વપિ સામ્યભાવાત્।
અવેહિ વિદ્વન્! મમતૈવ મૂલં,
શુચાં સુખાનાં સમતૈવ ચેતિ ॥૩॥
સ્ત્રીષુ ધૂલિષુ નિજે ચ પરે વા,
સંપદિ પ્રસરદાપદિ ચાત્મન્!।
તત્ત્વમેહિ સમતાં મમતામુગ્,
યેન શાશ્વતસુખાદ્વયમેષિ ॥૪॥
તમેવ સેવસ્વ ગુરું પ્રયત્નાદધીષ્વ,
શાસ્ત્રાણ્યપિ તાનિ વિદ્વન્!।
તદેવ તત્ત્વં પરિભાવયાત્મન્!,
યેભ્યો ભવેત્સામ્યસુધોપભોગઃ ॥૫॥
સમગ્રસચ્છાસ્ત્રમહાર્ણવેભ્યઃ,
સમુદ્ધૃતઃ સામ્યસુધારસોઽયમ્।
નિપીયતાં હે વિબુધા! લભધ્વમિહાપિ,
મુક્તેઃ સુખવર્ણિકાં યત્ ॥૬॥
શાંતરસભાવનાત્મા, મુનિસુંદરસૂરિભિઃ કૃતો ગ્રંથઃ।
બ્રહ્મસ્પૃહયા ધ્યેયઃ, સ્વપરહિતોઽધ્યાત્મકલ્પતરુરેષઃ ॥૭॥
ઇમમિતિ મતિમાનધીત્ય ચિત્તે,
રમયતિ યો વિરમત્યયં ભવાદ્વાક્।
સ ચ નિયતમતો રમેત ચાસ્મિન્,
સહ ભવવૈરિજયશ્રિયા શિવશ્રીઃ ॥૮॥